śrīḥ
śrīmate rāmānujāya namaḥ



Kriyasagaram

Volume – 2

śrī pāncarātra agame

भगवत् प्रतिष्ठा विधिः

(Sanskrit)

By:
Sri Pancharatra Agama Vidvan
Therazhundur K.Sriraman Battacharyar,
Sri Pancharatra Agama Samrakshana Sabha,
CG1-214, East Adayavalanjan St,
Srirangam, Trichy - 620-006.
97917-02035
sriramanbattachar@gmail.com
www.kriyasagaram.in

श्रीः

श्रीमते रामानुजायनमः

श्री भगवत् प्रतिष्ठा विधिः

श्री राजगोपाल स्वामि ध्यानम्-चम्पकारण्यमाहात्म्ये-

दक्षिणद्वारकामध्ये निशाख्य सरितस्तटे।
चिंतयेच्चंपकारामे कल्पद्रोः पादमूलके।
प्राकार गोपुरोपेते स्वर्णमण्टप सम्वृते।
नानारत्नमये दिव्ये स्वायंभुव विमानके।
तन्मध्ये गर्भगेहे तु पद्मपीठे स्थितंविभुम्।
वासुदेवं चतुर्बाहुम् इंद्रनीलसमप्रभम्।
सर्वाऽलङ्कार संयुक्तं शङ्खचक्र गदाधरम्।
दधानं दक्षिणे हस्ते रम्यामभय मुद्रिकाम्।
सुवर्णमकुटोपेतं मा मही परिसेवितम्।
तस्याग्रे राजगोपालं दिव्य सिह्मासनेस्थितम्।
दिव्यपीतांबरधरं दिव्याकल्प परिष्कृतम्।
दिव्यस्त्रग्गन्ध कस्तूरि कुंकुमाङ्कित वक्षसम्।
त्रिभङ्गि ललिताकारं परमात्मानमव्ययम्।
दक्षिणं स्वस्तितं वामं न्यस्यन्तं कुञ्चितं पदम्।
पद्मनाभं परंज्योति श्रियोवात्सव्य वक्षसम्।
अब्जाभ कण्ठविभ्राजत्कण्ठिकाद्यैरलंकृतम्।
मन्दस्मितमुदाराङ्गं मदनायुत सुन्दरम्।
रुक्मिणीं सत्यभामादि स्त्रीभिरष्टाभिरावृतम्।
षोडशस्त्री सहस्त्रेशं श्री चंपकेशं परात्परम्।
एक वस्त्रांचितो बालः बर्हपीडांबुजाननः।
गोपदण्ड चरोमंथन् चारयन् पशुमण्डलम्।
पादुकाक्त पदांबोज पद्माजानिरदृश्यते।

तं दृष्ट्वा प्रणमन्भक्त्या पुनरन्यमयाचितम्।
वस्तुमेस्तु दृशोरग्रे कस्तूरि तिलकांचितम्।
अस्तोक करुणारन्द्रं न्यस्तुलं चंपकालयम्।
हेमवेत्रं त्रिणतिमकरे दक्षिणे संदधानम्।
सत्यांसैन्यं करसरसिजम् वामभागे न्यसन्तम्।
व्यस्ताङ्घ्रि स्मितवदनया भैमया प्रेक्ष्यमाणः।
तिष्ठन् मध्ये कनकगहने श्रीराजगोपाल रूपः।

****

लक्षं तु चतुरो वेदाः लक्षं भरत मुच्यते ।
शिल्पं लक्षद्वयं चैव चातुर्लक्षं तु ज्योतिषम्।
पञ्च लक्षप्रमाणेन पांचरात्रं प्रशस्यते।
आगमं भरतं शिल्पं वैद्यं ज्योतिषमेवच।
पञ्चशास्त्राणां सम्योगात पाञ्चरात्रं प्रशस्यते।
पाञ्चरात्रोक्त विधिनायोऽर्चयेद्भगवद्धरिम्।
स वै न लिप्यते पापैः भुक्तिं मुक्तिं च विन्दति।
इत्यादि वैशेषिक प्रमाणेन विराजमान श्री पाञ्चरात्र आगमोक्त विधिना पूर्वाचार्यैः अनुग्रहीत भगवत्प्रतिष्ठा विधिं वक्तुं प्रारभ्यते।

आचार्य वरणम् तस्य लक्षणं च।

वेदान्तार्थ प्रवीणश्च पाञ्चरात्रार्थ तत्व वित्।
परम्परा दीक्षितस्य कुलेजातः समाधिमान्।
दीक्षामुभयतः प्राप्तः पञ्चकालःक्रियात्मकः।
योगशास्त्रः प्रवीणश्च ज्ञानवान्मोक्ष चिन्तकः।
भुवःपरिग्रहाद्यावत्प्रतिष्ठान्तं च याक्रिया।
असहायेन तां कर्तुं शक्तो मध्ये न रोगवान्।
स्वतन्त्रो वृद्ध सेवीच रूपवानपि चास्तिकः।
परैरनिन्दितैश्चैव कीर्तिमान् विजितेन्द्रियः।

मानसाराधने दक्षो मन्त्रशास्त्र विचक्षणः।
सिद्ध मन्त्रः सर्वदर्शी भट्टाचार्यः स उच्यते।
इत्युक्त भट्टाचार्य गृहस्य यजमानः स्वयं गत्वा। तस्यहस्ते नाळिकेरफलंदत्वा। साष्टाङ्गं प्रणम्य।
"अहं भगवतः विष्णोःमन्दिरं कर्तु मुद्यतः।
लक्षणज्ञो भवान् सौधं कर्तुमर्हसि शिल्पिभिः।
इति सविनयं प्रार्थ्य। ऋत्विजानां वृणीयात्।"
यूयं श्री पाञ्चरात्रस्य तत्वज्ञा ब्रह्म वादिनः।
अतोहरेः प्रतिष्ठार्थं प्रासादस्य मयासह।
कुरुध्वं कर्म विधिवत् नाऽपचारो भवेद्यथा।
इति स दक्षिण ताम्बूलेन सह ऋत्विग्वरणं कुर्यात्। प्रथमं
स्वगृहे भगवन्तम्पूजयित्वा। तदनन्तरं सवेद वाद्य घोषैस्सह माङ्गळ्यकुम्भेन मन्दिरं प्रविश्य। कार्तान्तिकैः (ज्योतिषशास्त्रकैः) सह प्रतिष्ठादिनं निश्चयित्वा।

<u>प्रतिष्ठा दिन निर्णयम्।</u>

सम्वत्सरे उत्तरायणे अति वैशेषिकः। आषाढ भाद्रपद, धनुर्मास-माघ मासादीन् वर्जयेत्। अन्यत्र मासेषु शुक्ल पक्ष द्वितीयादि पूर्णिमा कृष्णपक्षस्य सप्तमी पर्यन्तं गृह्णीयात्। अष्टमीं वर्जयित्वा। वासरेषु सोम सौम्य गुरु शुक्र रवि वाराणि प्रशस्ताः। नक्षत्रेषु अश्विनी रोहिणी पुनर्वसु पुष्यमी उत्तरत्रय हस्त श्रवण रेवति इत्यादयः श्रेष्ठतमः। लग्नेषु वृषभ मिथुन सिंह धनुः मीन तुला लग्नानि अति विशेषाः। एतेषु व्यतीपात संक्रान्ति ग्रहण मलमासादि गुरु शुक्र मौढ्यं वर्जितानि। यल्लग्नं या च तिथि च यजमानस्य राज्ञो राष्ट्रस्य क्षेमाय कल्प्यते तत्तिथौ सुलग्ने प्रतिष्ठापनं कारयेत्।

<u>याग शाला होम कुण्ड निर्णय विधिः।</u>

तदनंतरं यागशाला निर्माणंकुर्यात्। यागशालायां पंचवेदिकां कल्पयित्वा। प्रथमे मध्य वेदिकायां महाकुम्भ स्थापनार्थम्। द्वितीये विमान कुम्भार्थम्। नयनोन्मीलन शयनाधिवासार्थं।एकं बालकुम्भस्थापनार्थायच। मण्डल रचनार्थं ऐशान्ये पालिकास्थापनार्थं च आचार्यस्य हस्त प्रमाणेन नाभि पर्यन्तंउच्छ्राय पूर्वकं मेखला सहितं कारयेत्।

स्रुक्स्रुवादीनां विषये।

आचार्यस्य हस्त मानेन अग्रे द्व्यङ्गुल विस्तारयुत आज्य धारा गळयुतं स्रुवं कारयेत्।स्रुचः गोशफाकारयुत हस्तमान आयतं कृतं उत्तमं।यज्ञ वृक्षेण वा सुवर्णादि लोहैर्वा शङ्ख चक्राणि लांचित आकारेण कारयेत्।अष्टमङ्गलानि च फलकैर्वा लोहैर्वा कारयेत्। तत्फलके श्रीवत्सं, पूर्णकुम्भं, भेरि,दर्पणमण्डलं। मत्स्ययुग्मं, शङ्ख, चक्रादीनि लाञ्छन सहितं कुर्यात्। पार्श्वयोः द्वौ चामरौ छत्रादीनां च स्थायित्वा। पालिका शराव घटिकादीनांच सलक्षणेन सम्पादयेत्।

आज्य पात्रादीनां लक्षणमाह।

तालोन्नतं सुवृत्तं च सरोजाकार सन्निभम्।
षोडशाङ्गुल विस्तारं मुखेमूलेतु अङ्गुष्टकम्।
लोहजं मृण्मयं वापि आज्यपात्रस्य लक्षणम्।
लक्षणं चरुपात्रस्य हविःपचन कर्मणि।
मूले तद्वयङ्गुलं प्रोक्तं मध्यमे तु द्वादशाङ्गुलम्।
अग्रेतु षडङ्गुलं चैव सरोज मुकुळाकृतीं।
अष्टाङ्गुलोन्नतं चैव यद्वा तस्मात्षडङ्गुलम्।

प्रोक्षणी पात्रस्य लक्षणं।

मूले तत्र त्र्यङ्गुलं चैव मुखेतु द्वादशाङ्गुलं।
वृत्ताकारं च सौम्यं च सरोज कुसुमाकृतिम्।
एतत्प्रकीत्र्यते पात्रं प्रोक्षणार्थं चतुर्मुख।
प्रोक्षणीं समानरूपं च तत्प्रमाणेतु सम्मितं
प्रणीता पात्रं तद्विद्याद्यज्ञ कर्मणि पद्मज।(इति श्रीमन्नारायणे)

मार्कण्डेये घटादीनां लक्षणं

घटादीनामाकृतिं वक्ष्ये शृणुष्व नृपसत्तम।
पञ्चविम्शाङ्गुलाऽऽयामं विस्तारं तत्समं भवेत्।
विंशदङ्गुल मानं वा उदरं तद्वदेवतु।
अष्टादशाङ्गुलोच्छ्रायं द्वादशं षोडशंतु वा।
महाकुम्भंतु कुर्वीत तदर्धंच समाचरेत्।

कुम्भस्याऽर्धाम्श मानेन वर्धनीं कारयेत्तथा।
तस्योदरे न्यसेद्धोणं यथा लोचन सुप्रियं।
अष्टाङ्गुल समुच्छ्रायं आकृतिं कुम्भवत्तरं।
द्वारकुम्भमिति प्रोक्तं कलशस्तत्र उच्यते।
षडङ्गुलं तदुच्छ्रायं नाळिकेर फलोपमम्।
कलशाकारं इत्येव देवस्य स्नपनेषुच।

तन्तु वेष्टन विषये। मार्कण्डेये।

तन्तुभिःक्रम योगेण वेष्टयेन् मूलविद्यया।
महा कुम्भंत्रिसूत्रेण वर्धनींच द्विसूत्रतः।
कलशंत्वेक सूत्रेण अन्तरं यवमात्रकम्।
इत्युक्तवत् सूत्रवेष्टनं कुर्यात्।सुलग्ने मण्डपे सर्वत्र शुद्ध्यर्थं वासुदेवःपुण्याह वाचनं कुर्यात्। सौवर्णादि पटले धान्यपीठे षोडश दर्भ कृत कूर्चे श्रीविष्वक्सेन पूजां कारयित्वा।
हेमादि पटले दर्भैः षोडशभिःकृते।
कूर्चे सेनेशमावाह्य बालबिंबस्य पीठतः।
इति श्रीप्रश्नोक्तवत् सेनेश पूजां कृत्वा।
"देवसूत्रवती नाथ सर्वदेव नमस्कृत।
उपक्रान्तो मयाह्यद्य वासुदेवः प्रतिष्ठितः।
आगच्छतु हरेर्धाम अनुज्ञार्थं जगद्गुरोः।"
इति विष्वक्सेनं प्रार्थ्य। पूर्वोक्तवत् समस्तराजोपचारंश्च कृत्वा। नीराज्य।
प्रतिष्ठा रक्षणार्थाय हरिणा ज्ञापितो भवान्।
मृत्संग्रहणमारभ्य प्रतिष्ठा दिवसाऽवधि।
सेनापते मयासार्धं साधयाऽस्मत्क्रियां हरेः।
इति च प्रार्थ्य।पूर्वोक्तवत् पुण्याहजलेन सर्वत्र प्रोक्ष्य।आलयस्य विशुद्ध्यर्थं प्रज्वलित दर्भपुंजेनमन्दिरं सर्वत्र आकर्ष्य।घृत दीपान् प्रज्वाल्य।पंच गव्येन आलयसर्वत्र शुद्धिं कुर्यात्।

बाल बिम्ब प्रतिष्ठा विधिः।

आरभ्य माने प्रासादे बहवो विघ्न कारिणः।

बालालयं कृते देवी नश्यन्ति स्वयमेवहि।इत्युक्तवत् बालालय स्थापनं कृत्वा।

तत्सन्निधौ एव पूर्वोक्त सर्वकार्याणि प्रारभेत्। प्रधानमन्दिर स्थापनात्पूर्वं बालालयस्थापनं न चेत् मृत्संग्रहणादि कार्याणां पूर्वं बालकुम्भ स्थापनं कुर्यात्।तस्मिन् कुम्भे भगवन्तं क्षीरसागरात् हृदये आवाह्य। हृदब्जात् अस्मिन् कुम्भे आवाहयामि। इत्यावाह्य। षोडशोपचार पूजां कारयित्वा। इमां गादेन प्रार्थ्य।

ओं नमः पुण्डरीकाक्ष सर्वेश्वर जगन्मय।

क्षन्तुमर्हसि देवेश यन्मया बालमन्दिरम्।

अकृत्वैवं कृतं सद्म भक्ताऽनुग्रह काम्यया।

अस्मिन् आगच्छ भगवन् साधयाऽस्मत्क्रियां हरे। इति भगवन्तं प्रार्थ्य।

गर्भन्यादिसंस्कारकर्मरहित प्रतीष्ठा काले कर्तव्य विधिः

देव,धामबिम्ब प्रकल्पनकाले भूपरिग्रहादि दशसम्स्कारान् राहित्वात् तत्तत् सम्स्कार सिद्यर्थं क्रियमाण दशसम्स्कार होमानि प्रतिकर्म संकल्प पूर्वकं परिषेचन सम्पुटितंकुर्यात्। तदर्थं माध्याह्निक काले आचार्यः बाल कुम्भस्य (बिम्बस्य) पुरतः स्थण्डिले अग्निं प्रतिष्ठाप्य।

(१)भूपरिग्रह होमं करिष्ये इति संकल्प्य। परिषिच्य।

ओं नमो नारायणायेति समिधा षोडशाहुतीर्हुत्वा।

ओं नमोभगवते वासुदेवाय स्वाहा इति च हुत्वा। परिषिच्य।

(२)ततः भूकर्षण होमार्थं ओं हुं भगवते वराहाय हुंफट् स्वाहा।

इति ओं ह्रीं भूम्यै स्वाहा। इति समिदा च तिलेन च हुनेत्।

(३)भूपरीक्षा हवनार्थं ओं नमोभगवते वासुदेवाय स्वाहा इति

आज्य तिल गुग्गुळ नीवारेण च प्रत्येकं षोडशाहुतीर्हुत्वा।

(४)आधार शक्ति स्थापन हवनार्थं ओं ह्रीं आधार शक्त्यै स्वाहा।

ओं ज्ञां कूर्माय स्वाहा। ओं ह्रं कालाग्नये स्वाहा।ओं ह्रां

अनन्ताय स्वाहा। ओं ह्रीं भूम्यै स्वाहा। इति आज्येन प्रत्येकं अष्टोत्तर शताहुतीर्हुत्वा।

(५)शिला आद्येष्टका सङ्ग्रहार्थं

ओं नमो भगवते वासुदेवाय स्वाहा इति ओं विष्णु पार्षदेभ्य

स्वाहा इति च आज्येन षोडशाहुतीर्हुनेत्।

(६)मूलेष्टका हवनार्थं ओं नमो भगवते वासुदेवाय स्वाहा

इति ओं पुरुषाय स्वाहा इति ओं सत्याय स्वाहा

ओं अच्युताय स्वाहा।ओं अनन्ताय स्वाहा ओं सहस्त्रार हुम्फट् स्वाहा। इति समिदाज्य चरुणा प्रत्येकं अष्टाहुतीर्हुत्वा।

(७)गर्भन्यास होमार्थं ओं नमो भगवते वासुदेवायस्वाहा। ओं नमोविष्णवे स्वाहा ओं ह्रीं भूम्यै स्वाहा इति आज्येन अष्टाहुतीर्हुत्वा।

(८)मूर्धेष्टका स्थापन हवनार्थं द्वादशाक्षरेण चतुर्मूर्ति मन्त्रेण च आज्येन अष्टाहुतीर्हुत्वा।

(९)स्थूपिका कील स्थापनार्थं द्वादशाक्षरेण पुरुषादीनां मूर्ति मन्त्रेणच समिदाज्येन अष्टाहुतीर्हुत्वा।

(१०)बिम्बनिर्माण होमार्थं द्वादशाक्षरेण समिदा आज्य लाज तिल पुष्पेण च प्रत्येकं अष्टाहुतीर्हुत्वा। परिषेचनं पूर्णाहुतिं कृत्वा। अग्निं उद्वास्य। सायाह्न काले आलयानां बिम्बानां मानोन्मान शान्त्यर्थं हवनं कुर्यात्।स्थण्डिले अग्निं प्रतिष्ठाप्य ।षड्ऋत्विजैः सह आचार्यः ओं भूः स्वाहेति आज्येन। ओं भुवः स्वाहा इति तिलेन।ओं सुवःस्वाहा इति लाजेन।ओं महः स्वाहाइति अन्नेन। ओं जनः स्वाहा इति शमीपत्रेण।ओं तपः स्वाहा इति तण्डुलेन। ओं सत्यं स्वाहा इति समिधा च प्रत्येकं शताहुतीर्हुत्वा।सम्पाताज्येन विमानस्थूपिकानां च बिम्बादीनां च न्यस्य। पूर्णाहुतिं कारयेत्।अग्निमुद्वास्य। तदनन्तरं भू मृत्संग्रहणादि अंकुरार्पण कार्याणि प्रारभेत्।

मृत्संग्रहणविधिः।

अस्यदेवदेवस्य भगवतो.....सन्निधौमहाप्रतिष्टार्थं

मृत्संग्रहणकर्मकरिष्ये इतिसंकल्प्य।

श्रीगृहे मण्टपे बिल्वे तुलसी यत्रतत्रच।

विष्णु क्षेत्रे तथादिव्ये मृत्संग्रहणमाचरेत्।

इत्युक्तवत् मण्टपंगत्वा। स्वस्तिवाचनं शाकुनसूक्तंपञ्चशान्ति च पठित्वा।पुण्याहंवाचयित्वा। भुवं नवतालप्रमाणेन विलिख्य। धान्य पीठे खनित्रं निक्षिप्य। सकूर्चं आम्रपल्लवानिच बध्वा।सर्वत्र पुण्याह जलेन प्रोक्ष्य। आधारादि पद्मान्तमभ्यर्च्य । सर्वेषां अपि भूसूक्तं जपित्वा। ओं ह्रीं भूम्यै नमः आगच्छेति आवाह्य। आवाहनादि षण्मुद्रां प्रदर्श्य ।ओं ह्रां इत्यादि षडङ्गन्यासं कृत्वा किरीट कमल वनमाला पद्ममुद्रां प्रदर्श्य ।खनित्रे ओं हुं वराहाय नमः। इति ओं यज्ञार्ह देहाय पुराण पुरुषायमहावराहाय नमः आगाच्छाऽऽगच्छ इत्यावाह्य । अभ्यर्च्य आवाहनादि षण्मुद्रां प्रदर्श्य ।ओं

हां इत्यादि षडंग न्यासं कृत्वा।वराहमुद्रां प्रदर्श्य । सर्वत्र अर्घ्या दिभिःसंपूज्य। नीराज्य। मुद्रान्नं गुळापूपं निवेद्य । अष्टासुदिक्षु इन्द्रादीनावाह्या। ओं पुरंदरायनमः। ओं हुतावहाय नमः। ओं पितृपतये नमः। ओं राक्षसाधिपाय नमः। ओं अपाम्पतये नमः। ओं समीरणाय नमः। ओं वित्तपेशायनमः,ओं भागीरथि प्रियाय नमः। इत्यावाह्य अभ्यर्च्य ।

ओं क्रोडावतार भूम्याप्त हिरण्याक्ष निबर्हण।

प्रतिष्ठार्थं भगवतो मृत्सङ्ग्रहण कर्मणि।

इति खनित्रं प्रार्थ्य।अस्य देव देवस्य .....स्वमिनः राज राष्ट्राभिवृध्यर्थं प्रतिष्ठाङ्गं भू मृत्सङ्ग्रहण कर्म कर्तुं योग्यतासिद्धिं अनुग्रहाण। इति सभ्यनुज्ञां प्रार्थ्य। सर्वेषामपि

ओं उधृतासि वराहेण कृष्णेन शत बाहुना। भूमिर्धेनुर्धरणी

लोकधारिणी। इति विष्णुगायत्र्या भू गायत्र्या सह खनित्रेन भूम्याः मुख बाहु ऊरु स्तन मध्य जठर अङ्घ्रिषु मृदं आदाय। लोहजे वेत्रजेवा भाजने निक्षिप्य। दर्भैः वस्त्रेण

आच्छाद्य।अङ्कुरार्पण मण्डपं नयेत् ।

अंकुरार्पण काले विशेष कार्याणि।

उत्तमोत्तम पालिकास्थापन कालेतु देवतानां निर्णयमाह।

आग्नेये दक्षिणे भागे नैऋतेपि च पालिकाः।

घटिका वारुणे ब्राह्मे तथा पौरन्दरेपिच।

शरावा मारुते सौम्ये ईशानेच यथाविधिः।

षट्त्रिंशत्पालिका स्थापनकाले देवतानां नामानि।

स्वप्न पदस्थित वासुदेवादि मूर्तीनं चतुष्टयं ।ओं वासु देवाय नमः। ओं संकर्षणाय नमः। ओं प्रद्युम्नाय नमः। ओं अनिरुद्धाय नमः।जाग्रत्पद स्थित वासुदेवादि मूर्तयःअष्टौ च ओं वासुदेव,संकर्षण, प्रद्युम्न, अनिरुद्धः । ओं अनिरुद्ध प्रद्युम्न संकर्षण वासुदेवाय नमः।केशवादि मूर्तीनां द्वादशकं। तत्पत्नीनां द्वादशकं च। श्रीश्च वागीश्वरी कान्ति क्रिया शक्तिर्विभूतयः।इच्छा प्रीति रतिश्चैव माया धी र्महिमा इति।आहत्य षट्त्रिम्शद्देवतान् आवाहयेत्।

घटिकानां षट् त्रिम्शद्विषये।

ओं अनन्ताय नमः।ओं शक्त्यात्मने नमः।ओं मधुसूदनायनमः।ओं विद्याधिपाय नमः।ओं कपिलायनमः। ओं विश्वरूपिणे नमः।ओं विहङ्गमाय नमः। ओं क्रोडात्मने नमः। ओंबडबाननाय

नमः।ओं धर्मिणे नमः। ओं वागीश्वरायनमः। ओंएकार्णवशायिने नमः।ओं कूर्मपाताळ धारकाय नमः।ओंवराहायनमः। ओं नारसिह्माय नमः। ओं अमृताहरणाय नमः। ओं श्रीपतये नमः। ओं कान्तात्मने नमः।ओं राहुजितेनमः। ओं कालनेमिघ्ने नमः। ओं पारिजातहरयेनमः। ओं लोकनाथायनमः।ओं दत्तात्रेयाय नमः।ओं न्यग्रोध शायिने नमः। ओं एकश्रृङ्गतनुषे नमः।ओं वामनाय नमः। ओं त्रिविक्रमाय नमः। ओं नराय नमः। ओं नारायणाय नमः। ओं हरये नमः।ओं परशुरामाय नमः। ओं कृष्णाय नमः। ओं रामाय नमः।

ओं वेदविदे नमः। ओं कल्किने नमः।ओं पाताळ शयनायनमः। इत्येवं षट् त्रिंशद्देवताः।

<u>शरावाणां षड्विंशद्विषये।</u>

ओं स्वधायै नमः। ओंविद्यायै नमः।अरण्यायै नमः। ओं मायायै नमः।ओं मूर्त्यैनमः। ओं ह्रियै नमः। ओं श्रियै नमः। ओं कलायै नमः। ओं विद्यायै नमः। ओं निष्टायैनमः।ओं ऋचे नमः। ओं रुचये नमः। ओं इष्टायै नमः। ओं शोभायै नमः। ओं शुद्धये नमः। ओं विभूत्यै नमः। ओं भूत्यै नमः। ओं व्याप्त्यै नमः। ओं गत्यै नमः।ओं सुत्यै नमः। ओं यागायै नमः। ओं वागीश्वर्यै नमः। ओं रत्यै नमः। ओं सिद्ध्यै नमः। ओं नीत्यै नमः।ओं प्लुत्यै नमः। ओं क्रीडायै नमः।ओं सम्पत्कर्यै नमः। ओं कीर्त्यैनमः। ओं शिखायै नमः।ओं मत्यै नमः।ओं गायत्र्यैनमः। ओं मर्यादायै नमः।ओं हृष्ट्यैनमः।ओं शंखायै नमः। ओं चक्रायै नमः। इत्यादि षट् त्रिंशद्देवताः।आवाह्य अभ्यर्च्य ।तन्मध्ये धान्यपीठे सोम कुम्भं उपकुम्भ करकं च प्रतिष्ठाप्य सम्पूज्य।स्तण्डिले अग्निं प्रतिष्ठाप्य।आधारादि पद्मान्तं हुत्वा। सोम मन्त्रेण आवाह्य। समिदाज्य चरुभिः अष्टोत्तर शताहुतीर्हुत्वा। सम्पाताज्यं संगृह्य।नीवारादि धान्यानां नाम्ना च तत्तदधिदेवता नामानि च अष्टाहुतीर्हुत्वा।

पालिकादीनां अधिदेवतां उद्दिश्य चतुराहुतीर्हुत्वा।

ओं नीवाराधिपाय ओं केशवाय स्वाहा।

ओं शाल्याधिपाय ओं नारायणाय स्वाहा।

ओं गोधूमाधिपाय ओं मादवायस्वाहा।

ओं निष्पावाधिपाय ओं गोविन्दायस्वाहा।

ओं मुद्गाधिपाय ओं विष्णवे स्वाहा।

ओं वैणवाधिपाय ओं मधुसूदनाय स्वाहा

ओं प्रियङ्ग्वाधिपाय ओं त्रिविक्रमाय स्वाहा।

ओं तिलाधिपाय ओं वामनाय स्वाहा।
ओं माषाधिपाय ओं श्रीधराय स्वाहा।
ओं कुळुत्थाधिपाय ओंहृषीकेशाय स्वाहा।
ओं सर्षपाधिपाय ओं पद्मनाभाय स्वाहा।
ओं यवाधिपाय ओं दामोदरायस्वाहा।इति हुत्वा।
सम्पाताज्यं संगृह्य। पूर्व आज्येन सम्युज्य। बीजानि
पालिकादीनां च घृतारोपणंकुर्यात्।

(घृतारोपण विधिः (ईश्वर सम्हितोक्तं)

आचार्यः उभाभ्यां हस्ताभ्यां दूर्वा खण्डमादाय। घृते निमज्य।प्रतिस्खन्दं दूर्वाघृतेन व्याहृत्या प्रोक्ष्य। हस्त व्यत्यास मार्गेण च आग्नेयादि ईशानान्तं द्वादशाक्षरेण
प्रोक्ष्य। समस्त पालिकानांच बीजानांच प्रोक्ष्य। पालिकादीनां मृत्स्ना सम्पूर्य। ब्राह्मणैः अनुज्ञापूर्वकं बीजावापं कुर्यात्। सर्वेषां दक्षिणताम्बूलादीनि दत्वा। पूर्णाहुतिं कृत्वा। पायसान्नं निवेद्या।नीराज्य। (एवं अष्टोत्तर शत पालिका स्थापनं चेत् पृथक्पूजनं प्रतिष्ठा दिन पर्यन्तं सोम कुम्भ प्रोक्षणं च पायसान्न निवेदनं बलिदानानि कारयेत्। पालिकानां पूजा काले आग्नेयादि दिक्षु प्रारभेत्।पालिकादीनां षोडशं चेत् वासुदेवादि चतुर्मूर्तिः केशवादि द्वादशं आवाह्य। अष्टौ चेत् विष्णुवादीनावाह्य।चतुःपलिकाचेत् जनार्दन उपेन्द्र हरि कृष्णं आवाह्य। पंचोपनिषण्मन्त्रेण शान्ति होमं पूर्णाहुतिं च कृत्वा।अग्निमुद्वास्य, वास्तु शार्न्ति अष्ट दिक् बन्धनं कृत्वा।रक्षाबन्दनं कारयेत्।

रक्षाबन्धन कार्यक्रम विधिः उच्यते।

शुभे शोभने मुहूर्तैः आचार्यः धान्य पीठे सप्त पंच तन्तुना निर्मित सूत्राणि सुवर्ण रजत सूत्राणि च गृहीत्वा। ताम्बूलक्रमुखानि फलानिच गुळापूपेन सहितं प्रादक्षिण्येन याग गेहं प्रविश्य। पुण्याह जलेन प्रोक्ष्य। अपराजित मन्त्रेण जपित्वा।

अपराजित मन्त्रः

अस्य श्री अपराजित महा मन्त्रस्य।प्रद्युम्न ऋषिः।
अदितीश्छंदः।श्री विश्वरूपी नारायणो देवता।अं
बीजं। उं शक्तिः।मं कीलकं।भगवत् प्रतिसराभि
मन्त्रणार्थे जपे विनियोगः।

ओं नमो भगवते अनन्ताय सहस्त्र शीर्षाय सुगन्धिक्षीरोदार्णव शायिने नाग भोग पर्यङ्कायगरुडवाहनाय वासुदेवाय नमः। पीत वाससे सङ्कर्षण प्रद्युम्न अनिरुद्ध हयशीर्ष वराह नारसिह्म वामन त्रिविक्रम राम राम राम कृष्णः कल्कि परंब्रह्म नमोस्तुते। असुराः दैत्य यक्षराक्षस भूत प्रेत पिशाचाऽपस्मार सिद्ध योगिनी शाकिनि डाकिनि ब्रह्मराक्षस विनायक पूतना रेवतीस्कन्द पुरोगण नवग्रहादि नक्षत्र ग्रहान् अन्यांश्च महाग्रहान् हन हन पतीन् पतीभ्यः।अख्यातुमाख्यातु गृहाण गृहाण आविश आविश ध्वम्सय ध्वम्सय. त्रासय त्रासय द्रुह्य द्रुह्य चक्रेण गदावज्रेण भस्मी कुरु भस्मीकुरु स्वाहा।चक्र गदया वज्र सहस्त्रार मुख्य सर्व प्रहरणायुध बाहो जयजय विजय विजय अनन्तापराजित अप्रतिहत सहस्त्र नेत्र प्रज्वल प्रज्वल ज्वल ज्वल विश्व रूप मधुसूदन महापुरुष वैकुण्ठ नारायण पद्मनाभ हृषीकेश सर्वभूत वशंकर शङ्ख चक्र गदाधर सर्वभूत नमस्कृत सर्वनाग प्रमर्दन सर्वासुरोत्साधन सर्व देव नमस्कृत सर्व ग्रह निवारण सर्व यन्त्र प्रभंजन सर्व दुःख प्रशमन सर्वज्वर विनाशन सर्व भूतापकर्षण सर्व दुस्वप्न नाशन सर्वभक्त प्रदायक जनार्दन नमोस्तुते।

इति मन्त्रजपादनन्तरं भगवतः श्रीवत्सात् सूत्रेषु श्रियमावाह्य। श्रीसूक्तेन पूर्ववत् षोडशोपचारैः सम्पूज्य नीराज्य।ओं सहस्त्रारहुम्फट्'' इति सप्तवारमभिमन्त्र्य। बाल बिम्बस्य सन्निधिःचेत् भगवन्तं अर्घ्या दिभिःसम्पूज्य।

''भगवन् पुण्डरीकाक्ष करिष्ये कौतुक क्रियां।

महाप्रतिष्ठां देवेश तदर्थं त्वं प्रसीद ओं'' इति प्रार्थ्य।

अस्यदेवदेवस्य .....रक्षा बन्धन कर्म करिष्ये इति सभ्यनुज्ञां कुर्यात् प्रथमं भगवतः

ओं विश्वेत्ताते सवनेषु प्रवाच्यया याचकर्थ मघवन् इन्द्र सुन्वते । पारावतं यत् पुरुसंभृतं वश्वभावृणोच्छरभाय ऋषिबन्धवे।। इति बध्वा।

ओं बृहत्सामक्षत्रभृत् वृद्ध वृष्णियं तृष्टुभोजश्शुभित मुग्र वीरं इन्द्रस्तोमेन पञ्च दशेन मध्यमितम्वातेन सगरेणरक्षा।इति धूपेन रक्षां कृत्वा। आचार्यादीनां च बध्वा। दक्षिणानि दद्यात्

<u>यागशालायां हवनविधिः</u>

याग शालां गत्वा। आचार्यः भगवत्प्रतिष्ठार्थं चतुस्थानपूजां करिष्ये।तदङ्गं द्वार तोरण ध्वज कुम्भ देवतापूजनं च करिष्ये इति संकल्प्य।

१ पूर्व द्वारे

अश्वत्थ तोरणे ओं ऋग्यूपाय ओं सुशोभनाय नमः। ओं लं

इन्द्रायनमः। पा र्श्वस्थ रक्त ध्वजयोःओं कुमुदाय नमः।ओं
कुमुदाक्षाय नमः।कुम्भयोः ओं पूर्णाय नमः। ओं पुष्करायनमः।
इत्यभ्यर्च्य । अर्घ्या दिभिः सम्पूज्य।
ओं अग्निमीळे पुरोहितं .... रत्न धातमम्।
इतिपठित्वा। फलवर्ग ताम्बूलादीन्निवेद्य। नीराज्य।
२ दक्षिण द्वारे
औदुम्बर तोरणे ओं यजुर्रूपाय ओं सुभद्राय नमः।
ओं हं यमाय नमः।पा र्श्वस्थ पीत ध्वजयोः।ओं पुण्डरीकाय
नमः। ओं वामनायनमः। कुम्भयोः।ओं आनन्दाय नमः। ओं
नन्दनाय नमः। इत्यभ्यर्च्य ।
ओं इषेत्वोर्जेत्वा .... श्रेष्ठ तमाय कर्मणे। इति पठित्वा।सम्पूज्य।
३ पश्चिमद्वारे
न्यग्रोध तोरणे ओं साम वेद रूपाय ओं वं वरुणाय नमः।
ओं सुबन्धाय नमः। पा र्श्वस्थ नील ध्वजयोः। ओं शङ्कुकर्णाय
नमः। ओं सर्वनेत्राय नमः। कुम्भयोः ओं वीरसेनाय नमः।
ओं सुषेणाय नमः। इत्यभ्यर्च्य ।
ओं अग्न आयाही....सत्सि बर्हिषि।इति पठित्वा।सम्पूज्य।
४ उत्तरद्वारे
प्लक्ष तोरणे ओं अथर्व रूपाय ओं सोमाय नमः।सुहोत्राय
नमः।पा र्श्वस्थ शुक्लध्वजयोः।ओं सुमुखाय नमः। ओं
सुप्रतिष्ठाय नमः। कुम्भयोःओं सम्भवाय नमः ओं प्रभवाय
नमः। इत्यभ्यर्च्य ।
ओं शन्नोदेवीः .... अवन्तुनः। इत्यभ्यर्च्य सम्पूजयेत्।
हवन विधिः
अरणिमथनकाले।अरण्याधिदैवताय ओंश्रीमहालक्ष्म्यै नमः।
अरणि दण्डे। ओंनमोनारायणाय।नेमि वलये।

ओं सुदर्शनायनमः।सूत्रेषु ओं वासुखिने नमः।

ओं अनन्तायनमः।इत्यावाह्य। अभ्यर्च्य ।ओंनमोभगवतेवासुदेवाय इति अरणिं मथित्वा। तस्मादुत्पन्नमग्निं प्रथमं वृत्तकुण्डे प्रतिष्ठाप्य।पूर्ववत् वैष्णवीकरणान्तं कृत्वा। प्रार्थनामुद्रया सह लाजपूरित हस्तेन

अग्ने त्वं विष्णु सम्भूत तेजसासुप्रकाशसे।

तस्मात्वच्चित्त कमले सम्प्रार्थ्य गरुडध्वजं।

समाराधितुमिच्छामि गार्ह पत्यादिरूपिणे।

गार्हपत्यादिरूपेण त्वं स्थित्वा कर्मपूरय।

इतिप्रार्थ्य।प्राच्यादिषु कुण्डेषु भद्रासनं कल्पयित्वा।वृत्तकुण्डादग्निं सम्योज्य।

<u>चतुरश्र कुण्डमध्ये अग्नि ध्यानं।</u>

ध्यायाम्याहवनीयाग्निं चतुष्कोणाब्ज सम्स्थितम्।

मृत्स्नोध्व पुण्ड्र तिलकं जटामकुट मण्डितम्।

सप्त हस्तं शक्ति धरं स्रुक्स्रुवौ चक्र मंबुजम्।

दधानमंजलिं पीतवाससं यज्ञ सूत्रकम्।

त्रिमेखलं त्रिपादं च सर्वाभरण भूषितम्।

ओं रं आहवनीयाग्नये नमः।इतिध्यात्वा।

<u>चाप कुण्डमध्ये ध्यानम्।</u>

स्मराम्यहं दक्षिणाग्निं चाप पङ्कज मध्यगम्।

पंच शीर्षं त्रिनयनं सप्त जिह्वं जटाधरम्।

सद्ब्रह्मसूत्रं शोणाभं श्वेतमृत्स्नोध्व पुण्ड्रकं।

दश हस्तैस्संदधानंच अंजलिं स्रुक्स्रुवौ तथा।

शङ्खंचक्रं तोमरंच टंकं वज्रं कमण्डलम्।

त्रिपादं पीत वसनं आकल्पादिभिरुज्वलम्।

ओं रं दक्षिणाग्नये नमः।इति ध्यात्वा।

<u>वृत्त कुण्डे ध्यानं।</u>

स्मरामिगार्हपत्याग्निं वृत्ताब्जंच द्वि शीर्षकम्।

त्रिलोचनं सप्त जिह्वं लोहिताभं जटान्वितम्।
चतुर्हस्तैस्संदधानं स्रुक्स्रुवौ कुसुमांजलिम्।
त्रयंभि यज्ञोपवीतंच हारीत वसनोज्वलम्।
धृतोर्ध्वपुण्ड्र केयूर कटकाद्यैर्विभूषितम्।
ओं रं गार्हपत्याग्नये नमः।इति ध्यात्वा।
त्रिकोण कुण्डे अग्नि ध्यानम्।
चिन्तयामि त्रिकोणाब्जस्थितं सद्व्याऽनलम्विभुम्।
एक शीर्षं जटाचूडं सप्त जिह्वं त्रिलोचनम्।
ऊध्व पुण्ड्रधरं हेम यज्ञ सूत्र समन्वितम्।
पाटलाभं चतुर्दोर्भिःस्रुक्स्रुवौचांजqल धृतम्।
त्रिपादं पीतवसनं कुण्डलादिभिरुज्वलं।
ओं रं सब्य अनलाय नमः।इति ध्यात्वा।
अग्नि मध्ये अग्नेःप्रशमनार्थाय सप्तजिह्वा हवनं कुर्यात्।तन्मध्ये योगपीठं संकल्प्य। चतुरश्रकुण्डे आनन्द वैकुण्ठात् शरश्चन्द्र संकाशं ज्ञानादिषड्गुणाधीश्वरं लक्ष्मी प्रज्वलित श्रीवत्स वक्षसं वासुदेवं ध्यात्वा। ओं नमो भगवते वासुदेवाय। आगच्छ इत्यावाह्या।
चापकुण्डे।सम्मोदन वैकुण्ठात् बाल सूर्यनिभं ज्ञानशक्ति गुणद्वयाधिपं कीर्त्या समुज्वलित श्रीवत्सोरस्कं सङ्कर्षणं ध्यात्वा।ओं नमोभगवते सङ्कर्षणाय आगच्छ इत्यावाह्य।
वृत्तकुण्डे। आमोदन वैकुण्ठात् मरकत मणिमेचकं बल ऐश्वर्य गुणद्वयाधिपं जयाऽधिष्ठित श्रीवत्सोरस्कं प्रद्युम्नं ध्यात्वा।ओं नमोभगवते प्रद्युम्नाय आगच्छ इत्यावाह्य।
त्रिकोण कुण्डे। प्रमोदन वैकुण्ठात् नीलजीमूत निभं वीर्यतेजोगुण द्वयाधिपं मायाज्वलित श्रीवत्सोरस्कं अनिरुद्धं ध्यात्वा। ओं नमोभगवते अनिरुद्धाय आगच्छ इत्यावाह्य।अभ्यर्च्य ।
मूल मूर्ते यथाध्यानं अग्निमध्ये तथा भवेत्।
यानगेयानगं ध्यायेदग्नौ स्थाने यथास्थितम्।
आसनेचाऽथचाऽऽसीनं शयनेच तथाविधम्।
तद्वत् ध्यात्वा।आवाह्य। सर्वत्र अष्टाक्षरेणैव स्थिति न्यासं कृत्वा।वर्मणापरिषिच्य। अर्घ्या दिनैवेद्यान्तं अष्टादश उपचारान् तत्तन्मन्त्रेण सहस्र संख्यया शत संख्यया वा अष्टाविम्शतिः वा अष्टौ वा हुत्वा।

तत्तत्कुण्डाधिप मन्त्रेण धूप प्रसून घृत समित्पयो दधि तिल व्रीहि यवैःपूर्ववत् हुत्वा।जपार्थं च समिदाज्येन वा हुनेत्। नृसूक्त होमविषये आहवनीयाद्यनुक्रमेण तिलान्न गुळान्न हरिद्रान्न मुद्गान्नैःप्रत्येकं षोडशाहुतीर्हुत्वा

स्विष्टकृद्धोमादनन्तरं शान्तिमन्त्र चतुष्टयेन च पञ्चोपनिषण्मन्त्रेण च हुनेत्।

<u>शान्तिमन्त्र चतुष्टयमाह।</u>

१ ओं आयाह्यग्ने भूर्भुवस्सुवस्वाहा।

२ त्वंदेवानां बृहत्तरजातवेदो हुताशन भगवन् त्वम्मा हिगुम्सी स्वाहा।

३ ओं उत्तिष्ठ पुरुष रं हरि पिङ्गळदेहिन् द्रविणं प्रयच्छ स्वाहा।

४ ओं पतनमाहयाग्ने भूर्भुवस्सुवस्वाहा।इति।

पूर्णाहुतिं च कृत्वा परिषिच्य।

तर्पितोसि हृषीकेश होमेना ऽनलमध्यगा।

होमद्रव्येषु यद्वीर्यं तदिदं चात्मसात्कुरु।

इति स्रुक्स्रुवेण घृतेन सह महाकुम्भे स्पर्शं मन्त्रेण न्यसेत्।

एवं प्रतिष्ठादिन पर्यन्तं कारयेत्।

<u>कुम्भपूजाविषये विशेषः</u>।

पूर्ववत् धान्यपीठे महाकुम्भं उपकुम्भदशकैः सम्स्थाप्य।गाळितोदकैः आपूर्य। शोषणादीनि कृत्वा। तस्मिन्नवरत्नानि च षड्विम्शद्दर्भकृतकूर्चं निक्षिप्य। आधारादिपद्मान्तमभ्यर्च्य ।सर्वत्र कुम्भान् गरुडरूपं ध्यात्वा। सूत्रेषु ओं अनन्ताय नमः।इत्यादीनां ध्यात्वा। अथ एकाग्र चित्तः सांजलिहस्तः

भूलोकाधिपाय ओं विष्णवे नमः।सूर्यमण्डलाधिपेभ्यो ओं केशवादि द्वादश मूर्तिभ्यो नमः। चन्द्र मण्डलाधिपाय ओं हयग्रीवाय नमः। सिद्धलोकाऽधिपाय ओं मुकुन्दाय नमः। स्वर्ग लोकाधिपाय ओं उपेन्द्रायनमः।ओं महर्लोकाधिपाय नमः।

ओं इंद्रावरजाय नमः। ओंजनोलोकाधिपाय ओं जनार्दनायनमः। ओं तपोलोकाधिपाय ओं पुरुषोत्तमाय नमः। सत्यलोकाधिपाय ओं पद्मनाभाय नमः। सत्यलोकानामुपरि अण्डाद्बहिः वारि वाय्वहङ्कार बुद्धि अव्यक्ताऽऽवरणान् क्रमशःध्यात्वा।

<u>आवरणाद्युपरि</u>

प्रमोदन वैकुण्ठाधिपाय ओं अनिरुद्धायनमः।

आमोदन वैकुण्ठाधिपायओं प्रद्युम्नायनमः।
सम्मोदन वैकुण्ठाधिपायओं सङ्कर्षणाय नमः।
ओं आनन्द वैकुण्ठाधिपाय ओं वासुदेवाय नमः।
इति आनन्दवैकुण्ठान्तं स्वात्मानं प्रवेशं विचिन्त्य।
ततः परं तदूर्ध्वं परमानंद वैकुण्ठाख्य परम धाम प्रवेशंच स्मृत्वा। तत्र भगवन्तं प्रार्थ्य। अप्राकृत नानाविध दिव्य रत्न हेमादि विचित्रित विविध गोपुरोद्यान तटाक विमान ग्रह पङ्क्ति विराजित अनेक प्राकारावृतं।नानारत्न मुक्ताप्रवाळ तोरण सुगन्ध धूप माणिक्य दीपप्रकाशान्वितं। सुकुमार गन्ध नानावर्ण पुष्प वितानवंदन मालादि सुवासितम्। भावित रत्न चूर्ण विचित्रित रङ्गवल्यादि भूषित रत्न स्थल सोपान वेदिकाऽन्वितम्। मणिमय श्रृंगत्रय समुज्वलित सोमच्छन्द विमान शोभित मध्यप्रदेशे ।दिव्य रत्न मय सहस्त्रस्तम्भ मण्टप विराजितं, तेजो मयं परमानन्दाख्य परम धामं विचिन्त्य। तत्र प्रवेशनं च स्मरेत्।तत्र सोमच्छन्द विमानस्य मध्ये सहस्त्र फणामणि समुज्वलित शेषतल्पे उत्थान शायिनं स्वच्छेन्द्र नील नीरदाभमानहर संकाश विग्रहं। बालाऽऽतप पुंज गर्वहरण निपुण पीत वाससं। तत्क्षणोन्मीलित नीलाळि मध्यलसित पुण्डरीकाभ तिरस्कृत नयन युगळं। करिराज करचाराताहन्त बाहुद्वयं। किरीट कौस्तुभाद्याऽऽभरण भूषितम्।श्रीवत्सोरस्कं।अखिलहेय प्रत्यनीक कल्याण ज्ञानादि गुण षड्कनिधिं। स्वदेहतेजस्सम्भूत प्रभयाकृत्स्नं। जगद्भासयन्तं। अपर्याप्ताऽमृतदिव्य मङ्गलविग्रहं। चतुर्दश भुवनात्मक निखिलाण्ड कोटि सर्ग स्थिति ध्वंसादि विहरण संतुष्ट परात्परं।द्वादशाक्षरमन्त्रोपास्य मीश्वर कोटि कूटस्थ सनातनं। चिन्मयं। शंख चक्राद्यायुध धृत दिव्य पुरुषैः अनन्त गरुड विष्वक्सेनादि परिजनैः चण्ड प्रचण्ड कुमुदादि प्रमुख पार्षदैः नित्यसिद्ध नित्य मुक्तादि सूरिभिरात्म तुल्यया विद्युल्लता संघ प्रभया श्रियासम्मर्दित पाद पद्मयुगळं।परवासु देवं। दूराद्दर्शय भगवत्समीपं गन्तुं चण्डादिभ्यः आत्मप्रवेशनं याचयित्वा ।तैर्दत्त अनुज्ञातः भगवत्समीपमासाद्य भगवन्तं प्रणमेत्। वैकुण्ठात् सूर्यमण्डल द्वारा स्वहृदये विचिन्त्य।अर्घ्यादिभिः संपूज्य।तस्मिन्नावाहन पात्रे स्वागतं विचिन्त्य। आवाहन पात्रात् पुष्पांजलौ ध्यात्वा।पुष्पांजलिरूपेण महाकुम्भे आवाह्य।
अन्यत् सर्वं पूर्ववत् पूजयित्वा। उप कुम्भेषु सप्त दर्भकृत कूर्चं निक्षिप्य।तस्मिन् विष्णुवादि मूर्तिं पूर्वादिक्रमेण सम्पूज्य। करके सुदर्शनमावाह्य। उपकुम्भ महा कुम्भेष्वपि स्वर्णादि लोहेकृत
वासुदेवं शङ्खं चक्रं गदां पद्मं ध्वजं तथा।

श्रीवत्सं वैनतेयं च कूर्मराजं विनिक्षिपेत्।

करके। त्रिनाभियुक्तं षण्णेमि पंचारं चक्रमव्ययम्।

सम्वत्सरमयं यत्तत्कालचक्र मिति स्मृतम्।

इत्युक्तवत् कालचक्रयन्त्रं विनिक्षिप्य।उप कुम्भानां मध्ये अष्टमङ्गलानि सम्स्थाप्य।अभ्यर्च्य । पूर्णाहुत्यनन्तरं देवाय दर्शयेत्।

<u>विमानदेवतानां विषयमाह</u>।

मध्य कुम्भे परमानंद वैकुण्ठात् सूर्यमण्डल स्थितं सपक्षं विमानं तदधिष्ठानाधिपं ओं नमोभगवते अनिरुद्धाय आगच्छ इत्यावाह्य।पूर्ववत् समस्त उपचारान् समर्प्य।

अनिरुद्ध महामूर्ते मायासंश्रृत वक्षस।

सहस्त्र शीर्षचरण हस्तनेत्राऽद्भुतावृते।

विमान रूपिन् कुम्भेस्मिन् यावद्गर्भगृहे मया।

आवाह्यते व्योमयाने तावदत्र स्थिरो भव।

इति प्रार्थ्य। उपकुम्भादिषु पूर्वादिषु नरोत्तमादीन् आवाह्य।

स्फटिकप्रभ सन्निभं चक्र पद्म शंख गदाधरं ओं नमोभगवते

पुरुषोत्तमाय आगच्छ इत्यावाह्या अभ्यर्च्य ।

पूर्ववत्पूजनादीन् कृत्वा। श्यामळवर्णं पद्म गदाशंख चक्राऽलंकृतं ओं

नमोभगवते अधोक्षजाय। हेमाभं क्रमेण चक्र पद्म गदा शंख समुज्वलं ओं नमोभगवते.नारसिह्माय।पीताभं क्रमेण गदा पद्म चक्र शंखाऽलंकृतयुतं ओं नमोभगवतेअच्युताय।रक्त वर्णं क्रमेण पद्म चक्र शंख गदाधारिणं ओंनमोभगवते जनार्दनाय।मरकत श्यामं क्रमेण पद्म चक्र गदा शंख भूषितंओं नमोभगवते

उपेन्द्रायपीत वर्णं क्रमेण शंख चक्र पद्म गदा समुज्वलं ओं नमोभगवते हरये नमः। मेघ श्यामं क्रमेण शंख गदा पद्म चक्रविराजितं ओंनमोभगवते.कृष्णाय।करके ओं सहस्त्रारहुम्फट् । इत्यावाह्य अभ्यर्च्य ।चतुर्विधमन्नंनिवेद्य।नीराजयेत्।

मण्डल पूजाविषये विशेषः।

पूर्वोक्त प्रकारेण मण्डलं पंचवर्णैः तण्डुलैः वर्तयित्वा। आधारादि पद्मान्तं सम्पूज्य। कर्णिकामध्ये सूर्यमण्डलात् शेषपीठे ओं नमोभगवते वासुदेवायश्रीभूमिनीळा समेताय....स्वामिने नमः।आगच्छा इत्यावाह्य।

भगवन्पुण्डरीकाक्ष करुणामृत वारिधे।

सन्निधिं कुरु चक्राब्ज मण्डले यजनावधि। इति प्रार्थ्य। सम्पूज्य।दळेषु मार्ग शीर्षाधिपाय ओं केशवाय नमः।।इत्यादि दामोदरान्तं तत्तन् लक्षणेन आवाह्य।

सम्पूज्य।(एवं क्रमेण कुम्भ मण्डल वह्निषु भगवन्तं आवाह्य। स्नानासन शय्यासनं विना समस्त पूजां कुर्यात्।पूर्णाहुत्यनन्तरं कुमुदादिभ्यो बलिं दत्वा।

नीराजयेत्। एवं सायमारभ्य प्रतिष्ठादिनपर्यन्तं बालबिम्बपूजनं प्रथमं कुर्यात्।तदनन्तरं द्वारपूजां उपक्रम्यसमस्तं कुर्यात्।इत्यादि क्रमेण प्रतिष्ठादिनं परित्यज्य द्विकालादि अष्टम कालान्तं कुम्भादिषु त्रिस्थानेषु सहस्रादि

पूजनं कुर्यात्।

जलाधिवास विधिः

नूतन बिंबानां **जलाधिवास** विषयाणि तत्कारणं च।

प्रासादस्य विशुद्ध्यर्थं बिम्ब शुद्ध्यर्थ मेवच।

मानोन्मान प्रमाणानां न्यूनाधिक्योप शान्तये।

जगदाप्यायनार्थं च सर्व सम्पूर्ण सिद्धये।

प्रतिष्ठार्थं क्रियारम्भात् पूर्वमेव शुभे दिने।

पञ्च गव्यादिना स्नानं पूजा होमौ तथा जपं।

समाचरेत्स्व मन्त्रैस्तु यत्रैवं नकृतं पुरा।

हेतुना केनचित्तत्र जल वासं समाचरेत्।

एतत् कारणेन जलाधिवास अर्हत शिला लोह बिम्बानामेव नदीषु तटाकेषु वा शुद्ध जलेषु जलाधिवासं कारयेत्। यद्वाकटाहेषु वा एक त्रि पंच रात्रौवा सद्यो वा जलवासं कुर्यात्।जलमध्ये क्षीरार्णवं ध्यात्वा। मण्डपं कल्पयित्वा। तन्मध्ये भगवन्तं शाययित्वा। तत्परितः उपकुम्भाष्टकं करकेन सह महा कुम्भं सम्स्थाप्य। सर्वत्र पुण्याह प्रोक्षणं आधारादिपद्मार्चनं च बिम्बादीनामपि कारयित्वा। मध्य कुम्भे

विशाखयूपं ब्रह्माणं आवाह्य। उपकुम्भादिषु इन्द्रादीनावाह्य।करके सुदर्शनं च आवाह्य । सर्वत्र मूलमन्त्रेण अर्घ्या दिभिः संपूज्य।बिम्बस्य आकार शुद्ध्यर्थं तत्व सम्हार न्यासं करिष्ये इति सङ्कल्प्य।भगवद्बिम्बं पंचभूतमयं ध्यात्वा। वक्ष्यमाणेन विधिना तत्व सम्हार न्यासं कुर्यात्। ओं ङं नमः पराय चतुरश्राय पीत वर्णाय घ्राणोपस्थेन्द्रिय युताय शब्द स्पर्श रूपरस गन्ध गुण युताय पृथ्वी तत्वात्मने नमः।इति पादादि जान्वन्तं सम्हरामि।ओं घं नमःपराय स्फटिक वर्णाय अर्ध चन्द्राकाराय रसना पाय्विन्द्रिय युताय शब्द स्पर्श रूप रस गुण युताय अप् तत्वात्मने नमः।इति जान्वादि गुह्यान्तं सम्हरामि।ओं गं नमः पराय रक्त वर्णाय त्रिकोणाय दृष्टिचरणेन्द्रिय युताय शब्द स्पर्श रूप गुण युताय अग्नि तत्वात्मने नमः।इति गुह्यादि नाभ्यन्तं सम्हरामि।ओं खं नमः पराय धूम्र वर्णाय वृत्ताय त्वक्करेन्द्रिय युताय शब्दस्पर्श गुण युताय वायु तत्वात्मने नमः।इति नाभ्यादि नासान्तं सम्हरामि।ओं कं नमः पराय जलद वर्णाय निराकाराय वाक् श्रोत्रेन्द्रिय युताय शब्द गुण युताय आकाश तत्वात्मने नमः।इति नासादि मूर्धान्तं सम्हरामि। ओं पं नमःपराय सिताऽसित वर्णाय मनस्तत्वात्मने नमः।हृदि।

ओं फं नमः पराय पाटल वर्णाय अहंकारात्मने नमः हृदि।

ओं बं नमः पराय स्फटिकाभासाय बुद्धि तत्वात्मने नमः हृदि।

ओं भं नमः पराय सित वर्णाय प्रकृत्यात्मने नमः हृदि।

ओं मं नमः पराय स्फटिकाभासाय जीव तत्वात्मने नमः। हृदि।

इति बिम्बस्य सम्हार न्यासं कुर्यात्।अधिवास्य। प्रभाते कुम्भानुद्वास्य। मध्यकुम्भजलेनैव प्रोक्ष्य। नीराजयेत्।

छायाधि वास विधिः

सुधा दारु भित्ति रूप बृहद्बिम्बानामपि विमान गोपुरादीनां च चित्ररूप बिम्बानामपि जलाधि वास अनर्ह बिम्बानां छायाधिवासं कारयेत्। तद्विवरणमाह। धान्य पीठे कटाहे गन्धजलेनापूर्य। तस्मिन् शोषणादीनि कृत्वा।तज्जले क्षीरार्णवंध्यात्वा। आधारादिपद्मान्तं अभ्यर्च्य । अष्टाविम्शति दर्भकृतकूर्चं निक्षिप्य।भगवन्तं आवाह्य। श्रियादि देवीनां त्रयो विम्शति कूर्चं।बृह्मरुद्रादीनां पंच विम्शति दर्भ कृतकूर्चं।अन्यत्र बिम्बानां द्वि दर्भकृत कूर्चे अवागग्रं निक्षिप्य। पूर्ववत् सम्हारन्यासादीनि कृत्वा।ओं सशराय शार्ङ्गायनाराचाय हुम्फट्। इति चक्र मुद्रां प्रदर्श्य ।रक्षोहणं इतिमन्त्रंपठित्वा। रक्षां कुर्यात्।

छायाधि वासं पूर्वाह्ने सायाह्ने जलवासकम्

तथा नयन दानंच शयनं च महा निशि।

प्रातः प्रतिष्ठां कुर्वीत मुहूर्ते शास्त्र चोदितः।

*इत्यादीनां अधिवासादनन्तरं नयनोन्मीलनात् पूर्वं भगवन्तं नवकलश विधिना अभिषिच्य। लोह बिम्बानां तिन्त्रिणीफलोदकेन सम्शोध्य।रक्षा बन्धनं कृत्वा।

नयनोन्मीलन(अक्षिमोचन)विधिः।

भगवतः नयनोन्मीलनार्थं पर्यङ्के शाययित्वा। तिरस्करिण्यासंछाद्य। धान्य पीठे आडकप्रमाणं मधु सुवर्णपात्रेसम्पूर्य। रजतपात्रे तद्वत् घृतं पूरयित्वा। तादृश शलाकिकां निक्षिप्य। पूर्वपश्चिमभागे निधाय। तत्पुरतः अष्टधान्यानि अष्टलक्ष्मीं आवाहन पूर्वकं गाः कन्यकामपिदर्पणेन सह पूर्णकुम्भानामपि सम्स्थाप्य।

सङ्कल्प्य। पुण्याहजलेन प्रोक्ष्य।मधु घृत पात्रे शोषणादीनि कृत्वा ।मधु पात्रे मार्ताण्ड मण्डलात् पाटल वर्णकोटि सूर्य प्रतीकाशं शङ्ख चक्र गदाधरं तेजोमुद्रा समेतंओं नमो नारायणाय(ओं हं सूर्याय नमः) आगच्छ इत्यावाह्य। ''

मधुवातेति ''अभिमन्त्र्य। आज्य पात्रे इन्दु कोटि समप्रभं शंखचक्र गदा धेनुमुद्रा समेतं ओं हयग्रीवाय नमः । (ओं सं चन्द्रमसे नमा आगच्छ इत्यावाह्य। ''सविराजन्परियेत् इत्यभिमन्त्र्य। सर्वत्र अर्घ्यादिभिःसम्पूज्य। सवेद वाद्य घोषेणसह ''ओं चित्रं देवानां ''इति मन्त्रेण दक्षिण नेत्रं सुवर्ण सूच्यानारायणं स्मरन् उन्मीलयेत्। वाम नेत्रं ङ्गओं तच्चक्षुः इति

मन्त्रेणहयग्रीवं स्मरन् उन्मीलयेत्। तद्वत् सर्वत्र बिम्बानामपि उन्मील्य।तिरस्करिणीं व्यपोह्य। वाद्य घोषपुरस्सरं नीराज्य।गाः कन्यकामपि दर्शायित्वा। आचार्यः प्राचीन कुण्डे मधुसर्पिषा सह नेत्रोन्मीलन शान्त्यर्थं ओं तेजसे नेत्राभ्यां वौषट् ओं नमो भगवतेवासुदेवाय स्वाहा। इति अष्टोत्तरशताहुतीः हुत्वा। बिम्बस्य मूल मन्त्रेण अर्घ्यादिभिरभ्यर्च्य । सम्स्नाप्य।

वास्तु याग विधिः

आचार्यः यजमानेन सह मण्टपं प्रविश्य। सलक्षणेन वास्तुनाथं तिलेन विलिख्य। सप्त दर्भ कृत कूर्चं निक्षिप्य।तस्या ईशान कोणेतु प्रतीच्यां मस्तके रमे।

अधो मुखं पाणि युग्मं पादौचापि प्रसारितं।

प्रसारित तले पूर्वं विलिखेद्वास्तु दैवतम्।

तस्य उत्तरे क्षेत्रपालं आवाह्य। सर्वत्र पुण्याह जलेन प्रोक्ष्य।

वास्तुनाथस्य शिरसि ओं अम्शु मालिने नमः।दक्षिण बाहु
मूले ओं झषध्वजाय नमः। कूर्परे ओं कुमाराय नमः। हस्ते ओं विनायकाय नमः। पादयोः ओं अश्विनी देवताभ्यां नमः।मध्ये ओं चन्द्रमसे नमः। सव्यतः हस्ते ओं दुर्गायै नमः।कूर्परेसप्त मातृभ्यो नमः।बाहु मूले ओं स्थाणवे नमः। हृदये ओं विष्णवे नमः।नाभौ ओं ब्रह्मणे नमः।तस्य परितःअष्टासु दिक्षु इन्द्रादीनावाह्य। सम्पूज्य। तस्य पश्चिमे स्थण्डिले विधिवदग्निं प्रतिष्ठाप्य। गर्भादानादि कर्मणासंस्कृत्य।वास्तु नाथं आवाह्य। अर्घ्या दिभिर्हुत्वा। शमी अपामार्ग खादिर समिद्भिः वास्तु नाथस्य मूल मन्त्रेण यथाशक्ति हुत्वा। पुरुष सूक्ते न चरुणा षोडशाहुतीर्हुत्वा।पंचोपनिषण्मन्त्रेण सहस्रं वा शताहुतिं वा हुत्वा। तद्विषये।
ओं षौम्नमः पराय परमेष्ठ्यात्मने स्वाहा।ओं यांनमःपराय पुरुषात्मने स्वाहा।
ओं रांनमःपरायविश्वात्मने स्वाहा।ओं वांनमःपराय निवृत्यात्मने स्वाहा।
ओं लांनमःपराय सर्वात्मने स्वाहा।इति हुत्वा।तस्य शरीरान्तर्गत देवतानुद्दिश्य ओं अम्शु मालिने स्वाहा।इत्यादिभिः सकृद्धुत्वा। पूर्णाहुतिं कृत्वा।बलिं दध्यात्। देवतानां उद्वास्य। दर्भ पुंजेन वास्तुवत् कृत्वा।तस्मिन् तिलेन आवाह्य। तदग्नौ ज्वलयित्वा। सर्वतः परिभ्रमणंकृत्वा। पुण्याह जल प्रोक्षणं च कुर्यात्।अग्निमुद्वास्य। पञ्च गव्येनस्थलानि सम्शोध्य। कर्माङ्ग स्नपनं कुर्यात्।

<u>पञ्चभूतार्चनं कुर्यात्। तद्विवरणमाह।अनिरुद्ध सम्हितायां।</u>

प्रतिष्ठायां विशेषेण पंच भूतार्चनं चरेत्।
मृदालेपं जले स्नानं दीपं नीराजनं तथा।
गन्ध लेपं च सेचादि वाद्य वादन मेवच।
नीराजन विधानेन अग्नि पूजन मिष्यते।
मारुत प्रीणनार्थाय वेद वाद्यादिना चरेत्।
(१)तेषां पृथ्व्यंश सन्तोषण विषये। वल्मीक ह्रद दन्ती दन्त
तुळसी इत्यादि मृत्तिका स्नपनेन भवति।
(२)अग्नि तृप्ति विषये।नक्षत्र दीपा रोपणादि नीराजन पर्यन्तं
कर्तव्य दीप दर्शन पूजनेन भवति।
(३) अपाम्स तृप्ति विषये। प्रथमं पंच गव्येन स्नपनं।
जलाधि वासादनन्तरं मृत्तिका स्नपनं।मध्य कुम्भेनाभिषेचनं।

नयनोन्मीलनादनन्तरं पञ्च वा नववा कलशैः स्नपनं। तत्व
न्यास होमात्परं स्नपनं । शयनाधि वासादनन्तरं सप्त दश
षोडश कलशेन वा स्नपनं।प्रतिष्ठायां पूर्वे त्रिम्शद्भिः एक
विम्शद्भिःकलशैः वा स्नपनं।प्रतिष्ठायां पूर्व दिने कर्माङ्ग
स्नपनार्थ। सप्त दश कलशैःवा एकोत्तर अशीति कलशैः वा स्नपनं कुर्यात्। इत्यादिनां स्नपनैः वारिणा तृप्तिं भविष्यति।
(४)वायोः पूजन विषये। एवं नीराजनाऽनन्तरं भगवन्तं
विशेषसुगन्धेन च ह्रीभेर घनसार सुगन्धैः वस्तुभिः आलिप्यते। तेन वायु तृप्तिं प्राप्नोति।
(५)आकाश तृप्ति विषये। चतुर्वेदानि इतिहास पुराणानि मङ्गलवाद्येन गीतादीनां पठनेन आकाश तृप्तिं आप्नोति। एतत् पञ्च भूतात्मक तृप्तिभिः भगवान् अतीव सन्तुष्यति।अनुगृह्णाति च।
एतत्स्नपनाऽनन्तरं भगवतः श्रियादि देवीनां सह पर्यङ्केशाययित्वा। बिम्बस्य अप्राकृतत्व सिद्ध्यर्थं चतुरश्र कुण्डे तत्वन्यास होमं कुर्यात्।नूतन भगवद्बिम्बस्य स्थिर मूर्ति मात्रमेव षोडश न्यासं कुर्यात्। न तु अन्यत्र।

तत्वन्यास होम विधिः।

भगवन्तं पृथिव्यादि जीवान् सन्त्य तज्जीवं कुण्डस्य भगवति नियुज्येत। बिम्बानि शोषणादीनि कृत्वा। आज्य सम्स्कारादिपरिषेचनान्तं कृत्वा। अन्यस्मिन्पात्रे सम्पाताज्यं सङ्गृह्य।यजन काले स्वाहा इति न्यसन काले नमः इति च
तत्तदङ्गं भगवन्तं सम्स्पृश्य। न्यसनादनन्तरं ओं इति पिधाय।
ओं अं नमः पराय रवि सन्निभाय ईश्वर तत्वाधिपाय वासुदेवाय स्वाहा। इति भ्रू मध्ये
ओं मं नमःपराय स्फटिक वर्णाय जीव तत्वाधिपाय ओंनारायणाय स्वाहा। हृदि।
ओं भं नमःपराय असित वर्णाय प्रकृति तत्वाधिपाय ओंअनिरुद्धाय स्वाहा।हृदि।
ओं बं नमः पराय स्फटिक वर्णाय बुद्धि तत्वाधिपाय ओंउपेन्द्राय स्वाहा।हृदि।
ओं फं नमः पराय पाटल वर्णाय अहङ्गार तत्वाधिपाय ओं हरयेस्वाहा।हृदि।
ओं पं नमः पराय सिताऽसित वर्णाय मनस्तत्वाधिपाय ओंजनार्दनाय स्वाहा।हृदि।
ओं नं नमः पराय शुक्ल वर्णाय शब्द तत्वाधिपाय ओंमधुसूदनाय स्वाहा।श्रोत्रयोः।
ओं धं नमः पराय लोहित वर्णाय स्पर्श तत्वाधिपाय ओंत्रिविक्रमाय स्वाहा।त्वचि।

ओं दं नमः पराय तेजो वर्णाय रूप तत्वाधिपाय ओं वामनायस्वाहा।नेत्रयोः।
ओं थं नमः पराय पाण्डर वर्णाय रस तत्वाधिपायओं श्रीधराय स्वाहा।रसनायां।(जिह्वायां)
ओं तं नमः पराय असित वर्णाय गन्ध तत्वाधिपायओ हृषीकेशाय स्वाहा।घ्राणे।
ओं णं नमः पराय पाटल वर्णाय श्रोत्रेन्द्रियात्मने ओं अनिरुद्धाय स्वाहा।श्रोत्रयोः।
ओं ढं नमः पराय हेमवर्णाय त्वगिन्द्रियात्मने ओं पुरुषोत्तमाय स्वाहा। इति बाहुमूलयोः।
ओं डं नमः पराय हेमवर्णाय नेत्रेन्द्रियात्मनेओं अधोक्षजाय स्वाहा। नेत्रयोः।
ओं ठं नमः परायगौर वर्णाय जिह्वेन्द्रियात्मने ओं नृसिम्हाय स्वाहा।रसनायां।(जिह्वायां)
ओं टं नमः परायासित वर्णाय घ्राणेन्द्रियात्मनेओं अच्युताय स्वाहा। घ्राणे।
ओं ञं नमःपराय सित वर्णाय वागिन्द्रियात्मनेओं पद्मनाभाय स्वाहा। वाचि।
ओं झं नमःपराय रक्त वर्णाय हस्तेन्द्रियात्मने ओं दामोदराय स्वाहा।बाह्वोः।
ओं जं नमः पराय रक्त वर्णाय पादेन्द्रियात्मनेओं सङ्कर्षणाय स्वाहा। पादयोः।
ओं छं नमः पराय रक्त वर्णाय पाय्विन्द्रियात्मनेओं वासुदेवाय स्वाहा। पादयोः।
ओं चं नमः पराय हिरण्य वर्णाय मेहनेन्द्रियात्मने ओं प्रद्युम्नाय स्वाहा। मेहने।
ओं झं नमः पराय निराकाराय अंजन वर्णाय शब्द गुणयुताय
आकाश तत्वाधिपाय ओं केशवाय स्वाहा।इति मूर्धादि नासान्तम्।
ओं घं नमः पराय वृत्ताय धूम्र वर्णाय शब्द स्पर्श गुण युताय वायु तत्वाधिपाय ओं नारायणाय स्वाहा। इति नासादि नाभ्यन्तम्।ओं गं नमः पराय त्रिकोणाय पाटल वर्णाय शब्दस्पर्श रूप गुणयुताय अग्नि तत्वाधिपाय ओं माधवाय स्वाहा।
इति नाभ्यादि गुह्यान्तम्।
ओं खं नमः पराय अर्ध चन्द्राकाराय श्वेत वर्णाय शब्द स्पर्शरूप रस गुणयुताय अप्तत्वाधिपाय ओं गोविन्दाय स्वाहा।इति गुह्यादि जान्वन्तम्।
ओं कं नमः पराय चतुरश्राय पीत वर्णाय शब्द स्पर्श रूप रस गन्ध गुण युताय पृथ्वी तत्वाधिपाय ओं विष्णवे स्वाहा। इति जान्वादि पादान्तम्। हुत्वा। परिषिच्य। ततः परं प्राणादि दश वायुन्यासं करिष्ये इति सङ्कल्प्य। परिषेचनं।
ओं यं नमः पराय रजत वर्णाय प्राणाधिपाय ओं मत्स्यायस्वाहा।इति नाभ्यादि ब्रह्मरंध्रान्तम्।
ओं रं नमः पराय श्यामवर्णाय अपानाधिपाय ओं कूर्माय स्वाहा। इति नाभ्यादि वाम नासान्तम्।

ओं लं नमः पराय असित वर्णाय व्यानाधिपाय ओं वराहाय स्वाहा। इति आनाभि दक्षिण नासान्तम्।
ओं वं नमः पराय श्वेत वर्णाय उदानाधिपाय ओं नृसिम्हाय स्वाहा।
इति आनाभि वाम नेत्रान्तम्।
ओं शं नमः पराय स्वर्ण वर्णाय समानाधिपाय वामनाय स्वाहा।इति आनाभि दक्षिण
नेत्रान्तम्।ओं षं नमः पराय पीत वर्णाय नागाधिपाय भार्गवरामाय स्वाहा। इति नाभ्यादि वाम कर्णान्तम्।
ओं सं नमः पराय श्यामळ वर्णाय कूर्माधिपाय ओं रामायस्वाहा। इति नाभ्यादि दक्षिण कर्णान्तम्।
ओं हं नमः परायधूम्रवर्णाय कृकराधिपाय बलरामाय स्वाहा।इति नाभ्यादि पाय्वन्तम्। अलम्भुसानाड्याम्।
ओं ळं नमः पराय नील वर्णाय देवदत्तधिपाय कृष्णाय स्वाहा। इति नाभ्यादि मेड्रान्तम्। कुहू नाड्याम्।
ओं क्षं नमःपराय श्वेतवर्णाय धनंजयाधिपाय ओं कल्किने स्वहा। इति आनाभि पादान्तं कौशिन्याम्। हुत्वा।
सम्पाताज्येन तत्तत्स्थाने न्यस्य। ओं इति सर्वत्र पिधाय।परिषेचनं । अग्निमुद्वास्य।

<u>प्राणप्रतिष्ठा मन्त्र विषये</u>।(वैशेषिकम्)

अस्य श्री प्राण प्रतिष्ठा महा मन्त्रस्य। पद्मनाभ विष्णु संकर्षणऋषयः। प्राण शक्ति श्रीर्देवता। ओं अं बीजम्। स्वाहा शक्तिः।ह्रीं कीलकम्। श्रीं कवचम्। ऐंअस्त्रम्। रक्तो वर्णः। प्रतिकृतिप्राण प्रतिष्ठार्थे विनियोगः। ओं कं खं गं घं ङं पृथिव्यप्तेजो
वायु सुषुंणान्वित आकाशान्त भूततत्वात्मने ज्ञानायहृदयाय नमः।
ओं चं छं जं झं ञं ओं औं अःकुह्वान्वितोपस्थ अलम्भुसायुक्त पायु कैशिन्याश्रित पाद पाणि वागन्त कर्मेन्द्रिय तत्वात्मने ऐश्वर्याय शिरसेस्वाहा।
ओं टं ठं डं ढं णं अं आं इं ईं उं ऊं इडा पिङ्गळान्वित घ्राण जिह्वा गन्धिनी हस्तिनी रसज्ञायुक्त चक्षुत्वक्पूषा यशस्विन्याश्रित श्रोत्रान्त ज्ञानेन्द्रियात्मने शक्त्यै शिखायै वषट्।
ओं पं फं बं भं मं मनोऽहंकार बुद्धि प्रकृति जीवान्त प्रधानतत्वात्मने तेजसे नेत्राभ्यां वौषट्।
ओं यं रं लं वं शं षं सं हं ळं क्षं प्राणाऽपान व्यानोदान समान नाग कूर्म कृकर देवदत्त
धनंजयान्त प्राणाद्यात्मने अस्त्रायफट्।स्वात्मनि बिम्बेच षडङ्गमेवं कृत्वा। प्राण शक्तिं ध्यायेत्।

ओं आं ह्रीं क्रों पृथिव्यादि दनंजयान्तं पंचत्रिम्शत्तत्वाख्य विविध वर्णोज्वलित प्रसून वैकक्षक विराजितायै नमः।ओं जीवं तत्व मकरन्द झरी कोकनदद्वय धारिण्यै नमः।ओं आं ह्रीं क्रों प्राणशक्ति स्वरूपिण्यै ओं श्रियै नमः।मच्चित्ताऽरविन्दासने प्रसन्नो भव। इति मनसा गन्धादिभिरभ्यर्च्य ।

अथ सांजलि हस्तः ।

ओं पद्मप्रिये पद्मिनि पद्म हस्ते पद्मालये पद्मदळायताक्षि।

विश्व प्रिये विष्णु मनोनुकूले त्वत्पाद पद्मं मयि सन्निधत्स्व।

इति प्रार्थ्य। ओं आं ह्रीं क्रों प्राण शक्ति स्वरूपिण्यै ओं श्रियै नमः। मच्चित्त हृदब्जात् त्वङ् माम्साऽस्थि रुधिर मज्जामेधादि प्राकृत कळेभर वस्तु रहिते।शुद्ध सत्व ज्ञान घण सृष्टिस्थित्यन्त हेतुके अप्राकृत तत्व सहिते अस्मिन्दिव्य बिम्बनाभिकन्द स्थित दिव्य जीवे अनुप्रवेशय अनुप्रवेशय । सुखं चिरं तिष्ठन्तु।इति प्राण शक्ति बिम्ब प्रवेशनं विचिन्त्य। नाभिस्थानं ओं इति पिधापयेत्।एवं समस्त बिम्बानां प्राण प्रतिष्ठांकुर्यात्।

प्राण प्रतिष्ठाविधिः(क्रियाकैरवचन्द्रिकायां उक्तवत्) उच्यते।

अस्य श्री प्राण प्रतिष्ठा महा मन्त्रस्य । ब्रह्मा विष्णु महेश्वरो ऋषयः। ऋग्यजुस्सामऽथर्वाणि छंदगुंसि।सकल जगत्सृष्ठि स्थिति सम्हार कारिणी परा प्राण शक्तिः देवता। आं ह्रीं क्रों बीजं। स्वाहा शक्तिः। ओं कीलकं। बिम्ब प्राण प्रतिष्ठार्थे विनियोगः।ओं आं ह्रीं क्रों यरलवशषसह ओं हंसः अं ङं घं गं खं कं पृथिव्यप्तेजो वाय्वाकाश प्राणात्मने क्रों ह्रीं आं आं हृदयाय नमःस्वाहा।

ओं आं ह्रीं क्रों यरलवशषसह ओं हंसः इं नं धं दं थं तं शब्दस्पर्श रूप रस गन्धाऽपानात्मने क्रों ह्रीं आं ईं शिरसे स्वाहा।

ओं आं ह्रीं क्रों यरलवशषसह ओं हंसः उं छं झं जं छं चं वाक्पाणिपाद पायूपस्थ व्यानात्मने क्रों ह्रीं आं शिखायै वषट् स्वाहा।

ओं आं ह्रीं क्रों यरलवशषसह ओं हंसःएं णं दं ङं ठं टं श्रोत्र त्वक्कक्षु र्जिह्वा घ्राणोदानात्मने क्रों ह्रीं आं रों कवचाय हुं स्वाहा।

ओं आं ह्रीं क्रों यरलवशषसह ओं हंसः ओं पं फं बं भं मं मनोऽहंकार बुद्धि प्रकृतिजीव समानात्मने क्रों ह्रीं आं औं नेत्राभ्यां वौषट् स्वाहा। ओं आं ह्रीं क्रों यरलवशषसह ओं हंसः अं यं रं लं वं शं षं सं हं

ळं क्षं वचन गमनानंद विहरणोत्सर्गानन्द नाग कूर्मकृकर देवदत्त धनंजयात्मने क्रों ह्रीं आं अः अस्त्रायफट् स्वाहा।

ध्यानं।

रक्ताम्बोदिस्थपोतो ल्लसदरुणसरोजाधिरूढोकराब्जैः।
पाशं कोदण्डमिक्षूद्भवं अलिगुणमपि अंकुशंपञ्चबाणान्।
बिभ्राणां सृक्कपालं त्रिनयन सहितां पीनवक्षोरुहाड्यां।
देवीं बालार्क वर्णा भवतु सुखकरी प्राण शक्तिः परा नः।

मूल मन्त्रं

ओं आं ह्रीं क्रों यरलवशषसह ओं हंसःअमुष्य प्राणः इहप्राणःओं आं ह्रीं क्रों यरलवशषसह ओं हंसःअमुष्य जीव इहः मनोऽहंकार बुद्धिप्रधानपृथिव्यप्तेजो वाय्वाकाश श्रोत्रत्वक्क्षुर्जिह्वा घ्राण वाक्पाणि पाद पायूपस्थ त्वक्कर्म मांस मेधोऽस्थि मज्जा शुक्र प्राणाऽपान व्यानो दान समानाः इह आयान्तु सुखं चिरं तिष्ठन्तु स्वाहा। ओं इति। पूर्वमेव होमः न्यासश्च। श्रियादि देवीनां ब्रह्मादि परिवाराणांच एवमेव कुर्यात्। आलयस्य परिवार देवता होमविषये वैशेषिकविधिः।

अथ प्रथमावरणादि पञ्चमावरणान्तं वक्ष्यमाण क्रमेण प्रणवादि स्वाहान्तं तत्तन्मन्त्रेण हुनेत्।

(अन्तर्मण्डल द्वारे ओं द्रां चण्डाय स्वाहा।ओं द्रों प्रचण्डायस्वाहा। भगवदभिमुखे ओं क्षं गरुडाय स्वाहा।अन्तर्मण्डल द्वारपार्श्वयोः।ओं जयाय स्वाहा। ओं विजयाय स्वाहा।

नैऋते ओं श्री महालक्ष्म्यै स्वाहा। सोमे(ई)शानयो र्मध्ये ओं विष्वक्सेनाय स्वाहा। अन्तरे द्वारावरण प्राच्यादि द्वारचतुष्टये पार्श्वयोः प्राच्यां ओं पद्मधराय स्वाहा।

ओं गदाधराय स्वाहा। दक्षिणायां ओं खड्ग धराय स्वाहा।

ओं चाप धराय स्वाहा। पश्चिमायां ओं वज्र धराय स्वाहा।

ओं मुसल धराय स्वाहा।उदीच्यां ओं पाश धराय स्वाहा।

ओं अङ्कुश धराय स्वाहा।मध्यान्तर्हारे प्राग्द्वारे।ओं धात्रे स्वाहा।

ओं विधात्रे स्वाहा। दक्षिणे ओं भद्राय स्वाहा।

ओं सुभद्राय स्वाहा।पश्चिमे । ओं कृतान्ताय स्वाहा।

ओं असुर विध्वम्साय स्वाहा। उत्तरे कुबेराक्षाय स्वाहा।

ओं कुभेरकाय स्वाहा।महा बलिपीठे सर्वेभ्यो विष्णु पार्षदेभ्यःस्वाहा। इति प्रतिष्ठाऽऽलयस्य यावदावरण स्थितिः तावदन्तस्थित देवानुद्दिश्य जुहुयात्।यथाविधि शयनाधि वासं कृत्वा। प्रभाते शान्तिहोमं कुर्यात्।)

शान्तिहोमकाले वैशेषिक विधिः।

चतुरश्र कुण्डे ओं भूः स्वाहा।इति मधुना अष्ठोत्तर शताहुतिं हुत्वा सम्पाताज्येन ध्रुव भेरस्य (कर्मार्चायाः इति श्रीः) पादयोः

ओं नमो नारायणाय ।श्रीमन्नारायण चरणौ शरणं प्रपद्ये। श्रीमते नारायणाय नमः। इति त्रिवारं न्यस्य। चाप कुण्डे ओं भुवस्वाहा इति क्षीरेण हुत्वा। सम्पातेन देवस्य नाभौ

"ओं नमोभगवतेवासुदेवाय" इति न्यस्य।वृत्त कुण्डे ओं सुव स्वाहा इति दध्ना हुत्वा। सम्पातेन

"ओं नमो विष्णवे" इति देवस्य मुखे न्यस्य। त्रिकोणकुण्डे ओं भूर्भुवःसुवः स्वाहा। इति आज्येन हुत्वा।सम्पातेन देवस्यसर्वाङ्गेषु "विष्णु गायत्रिया" न्यस्य।(अन्यत्र)

प्रधान कुण्डे मन्त्रलोप शान्त्यर्थं मूल मन्त्रेण आज्यैः तिलैः पायसैः सिद्धार्थैः भक्ष्यैः मधुना च प्रतिद्रव्यं अष्ठाविम्शति सङ्ख्या हुत्वा। पूर्णाहुतिं चरेत्।

चाप कुण्डे क्रियालोपशान्त्यर्थं संकर्षण मन्त्रेण घृतेन पयसा दध्ना बीजेन धान्येन तण्डुलेन फलानि मूलानि पल्लवैश्च अष्ठा विम्शति संख्यया हुत्वा। पूर्णाहुतिं कृत्वा।

वृत्तकुण्डे द्रव्यलोपशान्त्यर्थं कमल पुष्पैः अन्य पुष्पैश्च आज्येन दूर्वाङ्कुरेण पूर्ववत् हुत्वा। पूर्णाहुतिं कुर्यात्।

स्वरलोपशान्त्यर्थं त्रिकोणकुण्डे पयसा धात्रीफलेन आज्येन अन्नेन कदलीफलेन शर्करया पद्म बीजेनच पूर्ववत् हुत्वा। पूर्णाहुतिं चरेत्।

एवं हवनाऽनन्तरं अग्निमुद्वास्य।

ओं तर्पितोसि हृषीकेश होमेनाऽनल मध्यग।

होमद्रव्येन यद्वीर्यं तदिदं चात्मसात्कुरु।इति अक्षतोदकं भूमौ निक्षिपेत्।

उद्वासन विधिः

अग्निमध्यस्थंदेवं बालकुम्भस्य चक्राब्ज कर्णिकानां केशवादि मूर्तीनामपि मध्य कुम्भे उद्वास्य। द्वारकेतनकुम्भस्थ देवानां पालिकाधि देवानामपि महाबलि पीठे

उद्वास्य। करकस्थं चक्रराजं द्वारे उद्वास्य। श्रियादि देव्यै सह भगवन्तं महाकुम्भ उप कुम्भेन सह "ओं उत्थिष्ठ''इति मन्त्रेणकरकास्त्र धारया सह मन्दं मन्दं परिभ्रमणं कृत्वा।देवस्य पश्चाद्भागे शाकुन सूक्तं। दक्षिणे ओं भद्रं कर्णेति च उत्तरे *ओं निषद्वरं' इति सामपठन् भगवन्तं व्योमयानस्थले स्थाप्य। विमान,राजगोपुरादीनां तत्तत्कुम्भेन आरोप्य। सर्वत्रपुण्याह जलेन प्रोक्ष्य।सूक्ष्म स्नपनं कृत्वा। आधारादि पद्मान्तं सम्पूज्य। विमान कुम्भे ओं नमो भगवते अनिरुद्धाय आगच्छ। इत्यावाह्य।

ओं सहस्त्र शीर्षचरण हस्तनेत्रैरलंकृत।

त्वद्रूप सदृशार्चायां सान्निध्यं शाश्वतं कुरु।इति प्रार्थ्य।

कलशाधार वेदिकायां सुदर्शनं ध्यात्वा। कुम्भस्थं देवं विमाने आवाह्य।अष्टाक्षरेण स्तिति न्यासं कृत्वा। आम्रपल्लवानि कूर्चेन च बद्वा। स्थूपिका एकस्य देवतः ओं

नमोनारायणाय।द्वयादिचतुर्थ्यन्तं। वासुदेव संकर्षण प्रद्युम्न अनिरुद्धादि मूर्तिं आवाह्य। पंचादि द्वादशं चेत् केशवादि द्वादशमूर्तिमावाह्य।अभिषिच्य। गुळान्नं नैवेद्य। नीराज्य। भूतबलिंदद्यात्।

भूत बलिविषये

(1)आद्याश्च कर्मजाश्चैव ये भूताः भुवि सम्स्थिताः।

प्रसन्नाः बलि तुष्टास्ते गृह्णन्तु बलि काङ्क्षिणः।

इति पललान्नेन।(शुद्धानं)पूर्वदिग्भागे।

(2)वृक्षेषु पर्वताग्रेषु ये विदिक्षुच सम्स्थिताः।

भूमौ व्योम्नि स्थिता येच बलिं गृह्णन्तु तेपिच।इति हरिद्रान्नेन दक्षिणे।

(३)विनायकाः क्षेत्रपालाः येचान्ये बलि काङ्क्षिणः।

पूषाद्याःपार्षदाश्चैव प्रति गृह्णन्त्विमं बलिं। इति लाजमिश्रितान्नेन।पश्चिमदिग्भागे।

(४) चण्डाद्याः कुमुदाद्याश्च ये भूताः सर्वतस्थिताः।

आगच्छन्तुपदे सर्वे गृह्णन्तु ते इमं बलिं। इति उत्तरे दध्यन्नेन बलिंदद्यात्।

अन्यत्र उप कुम्भ जलेन दिङ्मूर्तिं मण्डपं च यागशाला पाकशालादीनामपि प्रोक्ष्य। महा कुम्भं उप कुम्भेन सह भगवन्तमपि गर्भगेहं ओं ज्ञानाय हृदयाय नमः।

इत्युच्चरन् अन्तः प्रविश्य।कुम्भादीनामपि धान्यपीठेनिधाय।ब्रह्मस्थाने कर्मार्चां सम्स्थाप्य। वाम भागेमखार्चादीनां सम्स्थाप्य।सर्वत्र योगपीठार्चनं क्रमेण कृत्वा।

भगवत्प्रतिष्ठा कर्म करिष्ये। इति संकल्प्य।उपकुम्भस्थितान् विष्णवादिमूर्तिं महाकुम्भे चिद्घनं परमात्मानं व्योमातीतं मण्डलस्थं वासुदेवं चातुर्व्यूहादि सहितं बालस्तानस्थ पद्मनाभाख्य मूर्ति षड्ङ्क शाखान्वितं परवासुदेवं मूलेनाऽभ्यर्च्य । सुमुहूर्ते सपुष्फ तुलस्याक्षतांजलौ योगपीठे पद्मासनं विचिन्त्य।

एतत्कुम्भाद्दिव्यबिम्बे सान्निध्यं कर्तुमर्हसि।इति प्रार्थ्य।

मूल बिम्बस्य आवाहन विधिः

ओं वासुदेवादिपद्मनाभान्त षण्मूर्तिशाखान्विताय ईश्वरकोटिकूटस्थाय माहायूप वृक्षाय ओंनमोभगवतेवासुदेवाय अस्मात्कुम्भात् अस्मिन् मूल बिम्बे आगच्छ इत्यावाह्य।महाकुम्भात् पुष्पांजलौ ध्यात्वा। मूलभेरस्य मूर्ध्निसमर्प्य।ओं नमोभगवतेवासुदेवाय अस्मिन्बिबे सुस्थिरोभव ।इति चतुर्वारमुच्छार्य। कूर्चेन कुम्भतोयं मूलभेरस्य मूर्ध्नि संप्रोक्ष्य। प्राणप्रतिष्ठां च कृत्वा। ओं इति ब्रह्मरन्ध्रंपिधाय।

ओं नमोनिखिल निर्माणत्राण सम्हार कारक।

सुस्थिरो भव देवेश यावच्चंद्र दिवाकरौ। इति प्रार्थ्य। मूलभेरस्य आवाहनादि षण्मुद्रां प्रदर्श्य ।

द्वादशाक्षरेण स्तिति न्यासं कुर्यात्। किरीटादिमुद्रां प्रदर्श्य ।अर्घ्यादि मधुपर्कान्तं सम्पूजयेत्।

कर्मार्चादि षड्बेराणां आवाहन विषये।

तदनु ओं चक्राब्ज मण्डलाधिपाय ओं नमोभगवतेवासुदेवाय आगच्छा इति वार चतुष्टयमुक्त्वा। महाकुम्भस्थतीर्थै आवाह्य।पुष्पांजलिपूर्वकं पूर्ववत् देवस्य मूर्ध्नि तत्तोयं समर्प्य। पूर्ववत् आवाहनादि षण्मुद्राप्रदर्शन पूर्वकं द्वादशाक्षरेण स्थितिन्यासं कृत्वा। किरीटादि मुद्रांप्रदर्श्य ।

उत्सवार्चायां चतुष्कोणकुण्डाधिपाय ओं नमोभगवते(व्यूह) वासुदेवाय इत्यावाह्य।

बल्यर्चायां चाप कुण्डाधिपाय ओं नमोभगवते संकर्षणाय इत्यावाह्य।

स्नानार्चायां ओं वृत्तकुण्डाधिपाय ओं नमोभगवते प्रद्युम्नाय इत्यावाह्य।

तीर्थार्चायां त्रिकोणकुण्डात्मने ओं नमोभगवते अनिरुद्धाय इत्यावाह्य।

प्राणप्रतिष्ठां कृत्वा। ओं इति ब्रह्मरन्द्रं पिधाय। सर्वं पूर्ववत् आवाहनादि सम्मुखी करण पूर्वक अष्टाक्षरेण स्थिति न्यासं कृत्वा। किरीटादि मुद्रांप्रदर्श्य । अर्घ्यादि मधुपर्कान्तं सम्पूज्य।

शयनभेरे ओंनमोभगवते वासुदेवाय पद्मनाभाय आगच्छ इत्यावाह्य।प्राण प्रतिष्ठां च कृत्वा। विष्णु षडक्षरेण न्यासं कृत्वा। सर्वं पूर्ववत् कृत्वा। श्रीवत्सात् श्रीभूमि देवीमावाह्य।षडङ्गन्यासं कृत्वा। नृसूक्तमुच्चरन् कुम्भतोयेन संप्रोक्ष्य।नीराज्य।महाकुम्भेन सह वीरलक्ष्म्यालयं प्रविश्य। भगवतःश्रीवत्सात् श्रियं आवाह्य।अन्य भेरानां श्री कीर्ति जया मायां इत्यावाह्य। श्री सूक्तेनसम्प्रोक्ष्य। नीराज्य।अन्यत्र ऋत्विजःगर्भ गेहादि आलयानां,सर्व देवानां,भक्त बिम्बानां च सम्प्रोक्ष्य।महाकुम्भ जलेनैव प्रोक्षयेत् स्व स्व विद्यया। वृत्त कुण्डात् अग्निंआदाय।

(१)तेन गर्भगृहे अनिर्वाण दीपमारोप्य।

(२)पचनागारे चुल्यां च प्रतिष्ठाप्य तेन भगवन्निवेदनार्थं प्रसादानि

कृत्वा।चतुर्विधमन्नं नैवेद्य।

(३)नित्याग्नि कुण्डे च निक्षिप्य। ।

नाळिकेरफलाकारं अन्नं गृहीत्वा। गोपुराद्बहिर्गत्वा। इमां गादामुदीरयेत्।

गृह्णन्तु भगवद्भक्ताः भूताः प्रासाद बाह्यकाः।

बलमन्त्रः पवित्राश्च तेषामनुचराश्च ये।

प्रतिष्ठान्ते मयादत्तं सोदकं वैष्णवं बलिं।

गृहीत्वा तृप्तिमासाद्य स्थानं रक्षतु(वै हरेः) सर्वदा।

इति वाद्य घोषैस्सह विष्णु पदे बलिं दद्यात्।गर्भगेहं प्रविश्य।

त्वयाविना नमे किंचित् मां विना तवकस्तथा।

तस्मान् मां आत्मसात्कर्तुं प्रसीद परमेश्वर।

इति प्रार्थ्य।नीराज्य। अपराध क्षमापण पूर्वकं महदाशीर्वादं

कुर्यात्। आचार्यस्य तीर्थ प्रसाद स्वीकरण पूर्वकं संमानादीन् च कारयेत्।सायाह्ने नित्यपूजां कृत्वा।यानमारोप्य। वीथि भ्रमणं कृत्वा।

उपचारापदेशेन कृतानहरहर्मया।

अपचारानिमान् सर्वान् क्षमस्व पुरुषोत्तम।

इति भगवन्तंप्रार्थ्य। एकभेर विधानं चेत् त्रयहं कवाट बन्धनं कृत्वा।

तदनन्तरं स्नपनं नित्यपूजां च प्रारभेत्। तत्र श्रियादि देवीनांदेवेनसाकं कल्पने विवाहोत्सवं विभवेच्छानुसारत:कृत्वा। पृथक्केत् अंकुर पूर्वकं उद्वाहोत्सवं कारयेत्।

प्रतिष्ठा कार्य क्रमाणि

पुण्याहवाचनं कुर्यादनुज्ञां देशिकोत्तमः।
मृत्सङ्ग्रहण मारभ्य अङ्कुरार्पण माचरेत्।
वास्तु शान्ति ततःकृत्वा रक्षा बन्ध पुरस्सरं।
पञ्च गव्य प्रोक्षणञ्च पर्यग्नि करणम्तथा।
धान्याधि वासनम्चैव जलाधिवासमेव च।
छाया स्नपन पूर्वञ्च नयनोन्मीलनं तथा।
शयनाधिवासम्चैव न्यासहोमं तथाचरेत्।
(अष्ठबन्धन पूर्वन्तु प्रतिष्ठां कारयेत्तथा)
प्रातःकाले प्रतीष्ठादि नैवेद्यान्तं समाचरेत्।

इति क :श्रीरामन् भट्टाचार्यार्

****

श्रीः

श्री महालक्ष्म्याः प्रतिष्ठा विधिः

श्री शेष पक्षीश्वर पद्म गर्भ सेनेश मुख्यान् प्रतिबोदयन्तम्।

श्री पाञ्चरात्रागमाचार्यमाद्यं विष्णुं सदाहं शरणं प्रपद्ये।

स्वतन्त्र परतन्त्र महालक्ष्म्याः प्रतिष्ठा विधिः उच्यते। ग्राम मध्ये, नगरे, पत्तन मध्ये वा स्थापित सन्निधस्य स्वतन्त्रालयमिति नाम। देवालय आवरणेषु वा तदालयस्य वीथिषु वा प्रतिष्ठित आलयस्य परतन्त्रमिति नाम। सर्वत्रोपि प्रतिष्ठापनं पृथक् चेत् तत्र विधिः संग्रहेण प्रवक्ष्यते। भगवद्भागवदनुज्ञां पूर्ववत् लब्ध्वा। विष्वक्सेन स्थाने सुमुखीं वा सूत्रवतीं वा पूजयित्वा। पुण्याहं वाचयित्वा। मृत्संग्रहण काले भगवतीं इमां गादेन प्रार्थ्य।

क्षीरोध मथनायासे फल रूपे मधुद्विषः।
नमस्सरोरुहे वासे पद्मनाभ कुटुम्बिनि।
महाप्रतिष्ठा सिद्ध्यर्थं अङ्कुरार्पणमारभे।
ह्रीमतीं मृद् गृहार्थाय नियोजय हरिप्रिये।

इति प्रार्थ्य। कूर्चे ओं विष्वक्सेन प्रियायै ओं ह्रीमत्यै नमः। आगच्छ इत्यावाह्य। समस्त पूजां कारयित्वा।

लक्ष्मी प्रतिष्ठा सिद्ध्यर्थं आज्ञप्ता त्वन्मयासह।
मृदमानेतुमायाहि विष्वक्सेन कुटुंबिनी।

इति ह्रीमतीं(सूत्रवतीं) प्रार्थ्य। अङ्कुरार्पणादि सर्वं पूर्ववत् रक्षाबन्धन पर्यन्तं कृत्वा। जीर्णोद्धार स्थापनं चेत् विधिवत् शक्त्याकर्षणादीन् कृत्वा। यागशालां विधिवत् कारयित्वा।अस्याः देवदेव्याः भगवत्याः ....नायक्याः सन्निधौ महाप्रतिष्ठाकाले चतुस्थान पूजनार्थं **द्वार तोरण ध्वजकुम्भ पूजां** करिष्ये। इति संकल्प्य।

१ पूर्व द्वारे

अश्वत्थ तोरणे ओं ऋग्रूपायै नमः। तोरणस्तम्भमूलयोः

ओं चण्ड्यैनमः ओं प्रचण्ड्यै नमः। द्वार शाखासु ऊर्ध्वेओं वनमालिकायै नमः। ओं शच्यै नमः। पाश्वस्थ रक्त ध्वजयोः ओं धृत्यै नमः।ओं लज्जायै नमः।कुम्भयोः ओं ज्येष्टायै नमः। ओं विद्यायै नमः। द्वार ऊर्ध्वेओं क्षं गरुडाय नमः। पताकासु ओं विजयायै नमः।इत्यभ्यर्च्य।

अर्घ्यादिभिःसम्पूज्य। ओं अग्निमीळे पुरोहितं .... रत्न धातमम्। इतिपठित्वा। फलवर्ग ताम्बूलादीन्निवेद्य। नीराज्य।

२ दक्षिण द्वारे

औदुम्बर तोरणे ओं यजुर्रूपायै नमः। तोरणस्तम्भ मूलयोःओं बलाकिन्यै नमः।ओं वनमालिकायै नमः। द्वार शाखासु ओं बलाकिन्यै नमः।ओं काल नायिकायै नमः। पाश्र्वस्थ पीत ध्वजयोः।ओं सावित्रियै नमः।ओं मायायै नमः। कुम्भयोः।ओं श्रद्धायै नमः। ओं कान्त्यै नमः। इत्यभ्यर्च्य। द्वार ऊर्ध्वेओं क्षं गरुडाय नमः। पताकासु ओं विजयायै नमः। इत्यभ्यर्च्य । अर्घ्यादिभिःसम्पूज्य। ओं इषेत्वोर्जेत्वा .... श्रेष्ठ तमाय कर्मणे।इति पठित्वा। फलवर्ग ताम्बूलादीन्निवेद्य। नीराज्य।

३ पश्चिमद्वारे

न्यग्रोध तोरणे ओं साम वेद रूपायै नमः।तोरणस्तम्भ मूलयोःओं जयायै नमः।ओं विजयायै नमः।द्वारशाखासु ओं विभीषिकायै नमः।ओं शीतळायै नमः। पार्श्वस्थ नीलध्वजयोः।ओं शुद्धै नमः।ओं तुष्टै नमः।कुम्भयोः ओं सृष्टै नमः।ओं क्रियायै नमः। इत्यभ्यर्च्य। द्वार ऊर्ध्वेओं क्षं गरुडाय नमः। पताकासु ओं विजयायै नमः। इत्यभ्यर्च्य। ओं अग्न आयाही....सत्सि बर्हिषि।इति पठित्वा।अर्घ्यादिभिः सम्पूज्य। फलवर्ग ताम्बूलादीन्निवेद्य। नीराज्य।

४ उत्तरद्वारे

प्लक्ष तोरणे ओं अथर्व रूपायै नमः।तोरणस्तम्भ मूलयोः।विभीषिकायै नमः। शांकर्यै नमः।पार्श्वस्थ शुक्लध्वजयोः।ओं शान्त्यै नमः। ओं क्षीरव्यैनमः। कुम्भयोःओं क्षमायै नमः। ओं जयायै नमः। इत्यभ्यर्च्य। द्वार ऊर्ध्वेओं क्षं गरुडाय नमः। पताकासु ओं विजयायै नमः। इत्यभ्यर्च्य। ओं शन्नोदेवीः....अवन्तुनः। इतिपठित्वा। अर्घ्यादिभिःसम्पूज्य। नीराज्य।

पालिकासु पूर्ववत् संपूज्य।मध्ये सोमकुम्भाधिपायै ओं ओषधीशायै नमः।(इतिपाठान्तरं)

ओं चन्द्रिकायै नमः। इत्यावाह्य। पालिकासु अषटसु ओं वीर लक्ष्म्यै नमः। ओं धन लक्ष्म्यै नमः। ओं सन्तान लक्ष्म्यै नमः। ओं धैर्य लक्ष्म्यै नमः। ओं धान्य लक्ष्म्यै नमः। ओं राज्यलक्ष्म्यै नमः। ओं सौभाग्य लक्ष्म्यै नमः। ओं जय लक्ष्म्यै नमः। इत्यावाह्य। अष्ट धान्येषुओं शक्त्यै नमः।ओं विभूत्यै नमः। ओं इच्छायै नमः।ओं प्रीत्यै नमः।ओं रत्यै नमः।ओं मायायै नमः।ओं धियै नमः।ओं महिमायै नमः।इत्यावाह्य अभ्यर्च्य। फलादीन् निवेद्य। नीराज्य।(जीर्णोद्धारं चेत् विधिवत् शक्त्याकर्षणादीन् कृत्वा) रक्षाबन्धने प्रार्थनाविधिः।

सर्वज्ञे सर्व भूतानां अन्तस्थे शार्ङ्गि वल्लभे।
त्वत्प्रसादादहं पद्मे करिष्ये कौतुकक्रियाम्।
गृहाण जगदीशाने हस्ते कौतुक बन्धनम्।इति विज्ञाप्य।

महाकुम्भ पूजाविधिः

चतुष्कुण्ड मध्ये वेदिकायां धान्य पीठं निधाय। दशकलशान् संस्थाप्य। गन्धोदकेन संपूर्य।शोषणादीनि कृत्वा। सकूर्च, आम्र पल्लवानि, रत्नानि, सुवर्णादि प्रतिमां च निक्षिप्य।सर्वत्र आधारादि पद्मान्तं संपूज्य।महाकुम्भे ओं नमः कमलवासिन्यै श्रीं स्वाहा। इति द्वादशाक्षरेण आवाह्य। **आवाहनादि मुद्रा प्रदर्शन पूर्वकम् लक्ष्म्याः द्वादशाक्षरेण स्थिति न्यासं कुर्यात्।**

ध्यानम्।

नारायण प्रिये देवी मन्त्र शक्ति स्वरूपिणी।
भवसंताप हरण नील नीरद विग्रहे।
क्षीराब्धि फेण दवळ स्वच्छ वस्त्रोप शोभिते।
सर्वाभरण संपूर्ण षाड्गुण्यादि गुणोज्वले।
राजीव वाम करभे इच्छा शक्ति स्वरूपिणे।
शुद्धानंद चिदाकारे सर्वत्र समतांगते।
(श्री देवी ध्रुव बिम्बेऽस्मिन् सुस्थिरो भव सर्वदा)

इति प्रार्थ्य। किरीटादि मुद्रां प्रदर्श्य। अर्घ्यादि मधुपर्क धूपदीपान्तं संपूज्य। उपकुम्भाऽष्टकेषु पूर्वादिषु ओं शक्त्यै नमः।ओं विभूत्यै नमः।ओं इच्छायै नमः।ओं प्रीत्यै नमः।ओं रत्यैनमः।ओं मायायै नमः।ओं धियै नमः। ओं महिमायै नमः।करके ओं विजयायै नमः। इत्यावाह्य सर्वं पूर्ववत् संपूज्य।

मण्डल पूजाविधिः

पूर्ववत् चक्राब्ज मण्डलं सलक्षणेन रचयित्वा।सर्वत्र आधारादि पद्मान्तं संपूज्य। कर्णिकामध्ये ओं श्री महालक्ष्म्यै नमः। आगच्छा इत्यावाह्य। द्वादश दळेषु ओं श्रियै नमः।ओं वागीश्वर्यै नमः।ओं कान्त्यै नमः। ओं क्रियायै नमः।ओंशक्त्यै नमः।ओं विभूत्यै नमः।ओं इच्छायै नमः।ओं प्रीत्यै नमः। ओं रत्यै नमः।ओं मायायै नमः। ओं धियै नमः।ओं महिमायै नमः। इत्यभ्यर्च्य।मण्डल द्वार शाखासु ओं चण्ड्यै नमः।ओं प्रचण्ड्यै नमः। अभिमुखे ओं वैनतेयाय नमः।ऐशान्ये ओं ह्रीमत्यै नमः।

चतुष्कोणेषु ओं वसुधायै नमः।ओं नरकेसर्यै नमः।ओं वारुण्यै नमः।ओं विद्यायै नमः।इत्यावाह्या अभ्यर्च्य।

मण्डल मध्ये ध्यान विषये।

चक्राब्ज कर्णिका मध्ये धर्म कामार्थ मोक्षदाम्।

सर्व लक्षण सम्पन्नां सद्रत्न मकुटोज्वलाम्।

श्वेतमाल्यांबरधराम् हार केयूर भूषिताम्।

चतुर्भुजां महालक्ष्मीं रत्न ताटङ्कशोभिताम्।

अभीति वरदां हस्तां हेम पङ्कज धारिणीम्।

श्रियंशोद्भवां हेमवर्णां ध्यायेदादित्य मण्डलात्।

एवं आदित्यमण्डलात् श्रियादि द्वादश शक्ति परिवृतायै ओं श्री महालक्ष्म्यै नमः।आगच्छ इत्यावाह्य।कर्णिकायां मध्ये प्रार्थ्य।लक्ष्म्याः समान रूपं ध्यात्वा।अर्घ्यादिभिः संपूज्य।

<u>बिम्ब पूजा विधिः</u>

नित्यपूजावत् सर्वं कारयित्वा।अग्नौ विधिवत् सम्स्कृत्य। चतुष्कुण्ड विषये। वासुदेवादि मूर्तीनां तत्तद्देवीनां आवाह्य। यथा पूर्वे पद्म कुण्डे आनंद वैकुण्ठात् ओं लक्ष्म्यै नमः।दक्षिणे चाप कुण्डे आमोदन वैकुण्ठात् ओं कीर्त्यै नमः।पश्चिमे वृत्त कुण्डे संमोदन वैकुण्ठात् ओं जयायै नमः।उत्तरे त्रिकोणेवा योनि कुण्डेवा प्रमोदन वैकुण्ठात् ओं मायायै नमः। इत्यावाह्य।सर्वं पूर्ववत् हुत्वा। नेत्रोन्मीलन काले मधुपात्रे ओं नारायण्यै नमः।घृत पात्रे ओं विद्यायै नमः। इत्यावाह्य सर्वं पूर्ववत्। पञ्चगव्यादिषु अधिदेवताः विषये।पूर्ववत् मध्ये घृतकुम्भे ओं श्रियै नमः।आग्नेये गोमूत्रे ओं वागीश्वर्यै नमः।नैऋते गोमये ओं कान्त्यै नमः।वायव्ये गो क्षीरे ओं क्रियायै नमः।ईशाने दधि कलशे ओं शक्त्यै नमः। इत्यावाह्य

<u>देव्याः तत्वन्यास होम विषये।</u>

चतुरश्र कुण्डे विधिवत् अग्निं संस्कृत्य।अस्याः देवदेव्याः भगवत्याः नायक्याः ....सन्निधौ बिम्बस्य अप्राकृतत्व सिद्ध्यर्थं तत्वन्यास होमं करिष्ये। इति संकल्प्य।परिषिच्य।पृथक्पात्रे संपाताज्यं संगृह्य।

ओं मं नमःपरायै स्फटिकाभासायै जीव तत्वात्मिकायै स्वाहा। हृदि।

ओं भं नमःपरायैसित वर्णायै प्रकृत्यात्मिकायै स्वाहा।हृदि।

ओं बं नमःपरायै स्फटिकाभासायै बुद्धि तत्वात्मिकायै स्वाहा।हृदि।

ओं फं नमःपरायै पाटलवर्णायै अहंकारात्मिकायै स्वाहा। हृदि।
ओंपं नमःपरायै सिताऽसित वर्णायै मनस्तत्वात्मिकायै स्वाहा।हृदि।
ओं नं नमःपरायैशुक वर्णायै शब्द तन्मत्रात्मिकायै स्वाहा।श्रोत्रयोः।
ओं धं नमःपरायै लोहित वर्णायै स्पर्शतन्मात्रात्मिकायै स्वाहा।त्वचि।
ओं दं नमःपरायै ज्योतिर्वर्णायै रूपतन्मात्रात्मिकायै स्वाहा। नेत्रयोः।
ओं थं नमःपरायै पाण्डर वर्णायै रसतन्मात्रात्मिकायै स्वाहा।तालुनि।
ओंतं नमःपरायै सित वर्णायै गन्धतन्मात्रात्मिकायै स्वाहा।नासिकायां।
ओं णं नमःपरायै पाटल वर्णायै श्रोत्रेन्द्रियात्मिकायै स्वाहा।श्रोत्रयोः।
ओं ढं नमःपरायैहेमवर्णायै त्वगिन्द्रियात्मिकायै स्वाहा।त्वचि।
ओं डं नमःपरायैकृष्णवर्णायै नेत्रेन्द्रियात्मिकायै स्वाहा।नेत्रयोः।।
ओं ठं नमःपरायै गौर वर्णायै जिह्वेन्द्रियात्मिकायै स्वाहा।जिह्वायां।
ओं टं नमःपरायैसित वर्णायै घ्राणेन्द्रियात्मिकायै स्वाहा।नासिकायां।
ओं ञं नमःपरायैसित वर्णायै वागिन्द्रियात्मिकायै स्वाहा।वाचि।
ओं झं नमःपरायैरक्तवर्णायै पाणिन्द्रियात्मिकायै स्वाहा।हस्तयोः।
ओं जं नमःपरायैरक्त वर्णायैपादेन्द्रियात्मिकायै स्वाहा।।पादयोः।
ओं छं नमःपरायैहेमवर्णायै पाय्विन्द्रियात्मिकायै स्वाहा।अपाने।
ओं चं नमःपरायै हेमवर्णायै मेहनेन्द्रियात्मिकायै स्वाहा। मेहने।
ओं कं नमःपरायै हेम वर्णायै वाक् श्रोत्रेन्द्रिययुतायै निराकारायै शब्द गुणयुतायै आकाश तत्वात्मिकायै स्वाहा।मूर्धादि नासान्तम् ।
ओं खं नमःपरायै धूम्र वर्णायै वृत्तायै शब्दस्पर्श गुण युतायै वायु तत्वात्मिकायै स्वाहा।नासादि नाभ्यन्तम्।
ओं गं नमःपरायै रक्त वर्णायैत्रिकोणायै दृष्टि चरणेन्द्रिय युतायै शब्द स्पर्श रूप गुण युतायै अग्नि तत्वात्मिकायै स्वाहा।नाभ्यादि मेढ्रान्तं।
ओं घं नमःपरायै अर्धचंद्राकारायै स्फटिक वर्णायै शब्द स्पर्श रूप रस गुणयुतायै अप्तत्वात्मिकायै स्वाहा।गुह्यादिजान्वन्तं।

ओं ङं नमःपरायै चतुरश्रायै पीत वर्णायै घ्राणोपस्थेन्द्रिय युतायै शब्द स्पर्श रूप रस गन्ध गुणयुतायै पृथ्वी तत्वात्मिकायै स्वाहा। जान्वादिपादान्तं। प्रत्येकं अष्टाहुतीर्हुत्वा। तत्तदङ्गाणि संपादाज्येन संस्पृश्य महाभिषेकं कारयित्वा। नैवेद्य।श्रीसूक्तेन च हवनं कृत्वा।लक्ष्म्याः अष्टाक्षरेण समिदाज्य चरुणा प्रत्येकं शताहुतीर्हुत्वा। अन्यत्सर्वं पूर्ववदाचरेत्। पूर्णाहुत्यनंतरं हुतभुग्गतां शक्तिं मण्डले नियोज्य।(विमानस्य दिग्देवतानां विषये ओं तुष्टै नमः। ओं पुष्टै नमः।ओं वाग्देव्यै नमः।ओं सावित्रियै नमः।इत्यभ्यर्च्य।) मण्डलात् कुम्भे उद्वास्य।द्वार तोरण कुम्भादीन् तत्तत्स्थाने उद्वास्य।सवेद वाद्य घोषै स्सह सुमुहूर्ते महाकुम्भं उपकुम्भेन सह गर्भ गेहं प्रविश्य।धान्यपीठे कलशान् संस्थाप्य। कुम्भानां पुनःपूजां कारयेत्। मूल भेरादीनांआधार शक्त्यादि योग पीठार्चनं कृत्वा। धूपदीपं समर्प्य।महाकुम्भ गतां शक्तिं पुष्पाञ्जलौ स्वहस्ते ओंनमःकमलवासिन्यै श्रीं स्वाहा अस्मात् कुम्भात् ध्यायामि। इति ध्यात्वा।पुष्पाञ्जलि शक्तिं अस्मिन् दिव्यबिम्बे ध्यायामि आगच्छाऽऽगच्छ आवाहयामि। इत्यावाह्य। इति पुष्पाञ्जलिं मूलभेरस्य मूर्ध्नि समर्प्य।आवाहनादि षण्मुद्रां प्रदर्श्य। इमां गादां उदीरयेत्।

अरविन्दासने देवी पद्मगर्भ समुद्भवे।
पद्ममालिनि पद्माक्षि सर्वभूतेश्वरीन्दिरे।
सर्वज्ञे सर्व भूतानामन्तस्थे सर्वसाक्षिणी।
अशेषजगदीशाने विष्णुवक्षस्थलस्थिते।
भक्तानां पुत्र पौत्रादि भूमि संपत्प्रदायिनी।
अस्मिन् बिम्बे चिरंकालं सान्निध्यं कर्तुमर्हसि।

इति प्रार्थ्य।महाकुम्भ जलेन प्रोक्ष्य।उप कुम्भ गतां शक्तिं मूलभेरस्यपीठे उद्वास्य।प्राणप्रतिष्ठां च कृत्वा। नाभ्यादि हृदयान्तं लक्ष्म्याः द्वादशाक्षरेण स्तिथिन्यासं कृत्वा। अर्घ्यादिभिः सम्पूज्य।कर्मार्चादि बिम्बानामपि भगवत् प्रतिष्ठाविव सर्वं कारयित्वा।क्षीरगुळान्नं निवेद्य।नीराज्य।

भू देव्याः ध्यान विषये वैशोषिकम्।

नीलषद्दद पुञ्जाभ कुटिलालक कोमळे।
कल्हार दक्षिण करे भोग शक्ति स्वरूपिणी।
समस्थ चिदचिद्भेद मन्त्र यंत्र विधायिनी।
भूदेवी त्वं ध्रुवार्चायां सान्निध्यं कर्तुमर्हसि।इति प्रार्थ्य।

पृथक्स्थाने भूदेव्याः(गोदादेवीः प्रतिष्ठा काले मूलमन्त्रमाह)

ओं वराह भगवद्विशिष्ठायै ओंनमो ह्रीं भूम्यै ओं गोदायै नमः।

ध्यानं

नमस्संपूर्ण षड्गुण्य विग्रहायै किटिप्रिये।

स्वतन्त्रं विश्वसिद्धानां हेतुश्चात्र महाद्भुते।

तत्वाऽरविंद सन्दोह विहार चतुरश्रमे।

नील जीमूत संकाशे हेमांबर सु मध्यमे।

कल्हारकुड्मलकरे सर्व भूषण मण्डिते।

हिरण्याक्षासुरध्वंस मूलभूते जगद्धिते।

जगद्धितान शालिन्यै विष्णु पत्न्यै नमो नमः।

नमोनंदाचिदाकारे गोविन्द गृह मेधिनी।

श्री गोदे ध्रुव बिम्भेस्मिन् सर्वदा सन्निधिं कुरु।इति प्रार्थ्य।

इति महालक्ष्म्याः प्रतिष्ठा विधिः संग्रहः।

श्रीसूक्त जप होम आराधन विधिः

अस्य श्री पञ्चदशार्चन श्रीसूक्त माहमन्त्रस्य। आनन्द कर्दम चिक्लीत इन्दिरासुताः ऋषयः। आद्यस्तिस्त्रोऽनुष्टुभाः, चतुर्थी बृहती, पञ्चमीषष्टी, तृष्टुभौ,अष्टमो अनुष्टुभः, अनत्याप्रस्तारा पङ्क्तीछन्दाः। श्री महालक्ष्मीर्देवता। हिरण्यवर्णामिति बीजम्। तांम आवह इति शक्तिः। कीर्तिमृद्धिं ददातु मे इति कीलकम्। श्री नामक महालक्ष्मी प्रेरणया महालक्ष्मीः प्रीत्यर्थं पंचदशार्चन श्रीसूक्त जपे विनियोगः।

ओं महालक्ष्म्यै नमः अङ्गुष्टाभ्याम् नमः।। ओं श्रियै नमः तर्जनीभ्याम् स्वाहा। ओं लक्ष्म्यै नमः मध्यमाभ्याम् वषट्। ओं मायायै नमः अनामिकाभ्याम् हुम्। ओं इंदिरायै नमः कनिष्टिकाभ्याम् फट्. ओं रमायै नमः नखमुखैर्वौषट्।

ओं महालक्ष्म्यै नमः हृदये।। ओं श्रियै नमः शिरसे स्वाहा। ओं लक्ष्म्यै नमः शिखायै वषट्। ओं मायायै नमः बलायकवचाय हुम्। ओं इंदिरायै नमः तेजसे नेत्राभ्यां वौषट्। ओं रमायै नमः वीर्याय अस्त्राय फट्.।ध्यानम्।

अरुणकमल संस्था तद्रजत पुंज वर्णा।

करकमल धृतेषा भीतियुग्मांबुजाता।
मणिमकुट विचित्राऽलंकृतिः पद्ममाला।
भवतु भुवनमाता संन्ततं श्रीं श्रियै नः।

अङ्गपूजा विषये

ओं हिरण्य वर्णां...जतवेदोम आवह। मुखे
तांम आवह..पुरुषानहम्। नेत्रयोः।
अश्व पूर्वां.. देवीर्जुषताम्। कर्णयोः।
कांसोस्मिताम्...तां मिहोपश्व येश्रियम्। नासिकायाम्।
चन्द्रां.. त्वां वृणे। वदने।
आदित्यवर्णे....बाह्याऽलक्ष्मीः। कण्ठे ।
उपैतुमां... ददातु मे। बाह्वोः।
क्षुत्पिपासा... मे गृहात्। हृदये।
गन्धद्वारां... ये श्रियम्।नाभौ।
मनसः काम.... यशः। गुह्ये।
कर्दमेनः...पद्ममालिनीम्।पायौ।
आद्रांम पुष्करिणीं... म आवह। ऊर्वोः।
आद्रां यह कैरिणीं...म आवह। जान्वोः।
तांम आवह... पुरुसानहम्।जङ्घयोः।
ओं महा देव्यैच ... प्रचोदयात्. पादयोः।इत्यावाह्य.। प्रार्थना।
"नमो देवीजगद्धात्री पद्मपत्राक्ष वल्लभे।
पाहिमां करुणामूर्ते प्रसीदमयि सर्वदा।
प्रसीद श्री जगद्भूतः श्रीसूक्तार्चनमुत्तमम्।
निर्विघ्नं कुरु मे देवी अनुज्ञां देहि मे रमे।इति प्रार्थ्य ।

प्रतिष्ठा काले प्रार्थना विशेषः

सर्वलोकप्रिये लक्ष्मी सर्व दारिद्र्य नाशिनी।
प्रतिष्टां कारयिष्यामि तदर्थं त्वं प्रसीद ओं।

पूर्ववत् पञ्चदश ऋग्भ्यां आवाहनादि षोडशोपचारैः संपूज्य।

श्रियः पञ्चदशार्चं च श्रीकामः सततं जपेत्। हवन विधौ कमलपुष्पैः अष्टोत्तरशतं वा अष्टाविंशतिः वा हुनेत्। बिल्वसमिधा हवनं च कुर्यात्। पूर्णाहुतिं अन्यत्सर्वं पूर्ववत्। अर्चना विषये- हरिद्रा चूर्णैः, कुंकुमेन वा अष्टोत्तर सहस्रनामभिः, अष्टोत्तरशतनामभिः वा कुर्यात्.क्षीरगुळान्नं निवेद्य। नीराज्य। महदाशीर्वचन पूर्वकं आचार्य संमानादीनि कृत्वा। यजमानस्य लक्ष्मीकटाक्ष, सर्वकार्यजयसिद्धिरस्तु। इति लक्ष्मीकामकल्पन विधिः।

<u>अनुबन्धम्-२</u>

महालक्ष्म्याःमानसाराधन प्रार्थना।

सौवर्णस्थालिवल्ये मणिघण खचिते गोघृताक्तान् सुपक्कान्।

भक्ष्यान् भोज्यांश्च लेह्यानपरिमितमिहे शोष्यमन्नं निधाय।

नाना शाखैरुपेतं दधिमधुगुळक्षीर पानीययुक्तं।

तांबूलं चापि लक्ष्म्याः प्रतिदिवसमहो मानसं(बाह्यकं) कल्पयामि।।

"स्वागतं तव पद्माक्षि सन्निधिं भज मेंबुजे।

गृहाण मानसीं पूजां यथार्ह परिभाविताम्।"

संमुखीकरण प्रार्थना-

सान्मुख्यं कुरु कल्याणि सर्वदा सर्वकामदे।

द्रव्यमन्त्रक्रिया भक्ति श्रद्धा हानिं क्षमस्व मे।

अर्घ्यादि उपचाराणां समये प्रार्थना-

क्षीरोध मथने देवी वासुदेव प्रियेंबुजे।

त्वां भक्त्या पूजयांयद्य भोगैरर्घ्यादिभिः क्रमात्।

स्नानासनकाले प्रार्थना-

स्फुटीकृतं मया देवी इदं स्नानासनं महत्।

आसादयासु स्नानानार्थं मदनुग्रह काम्यया।

नमस्ते सिन्धु संभूते नमस्ते पद्मसंभवे।

नमस्सरोरुहे वासे नारायणकुटुंबिनी।

अलङ्कारासन प्रार्थना-

देवदेव प्रियेदेवी सर्वभूते हृदिस्थिते।

अलङ्कारासनं हृद्यं समाश्रय हिताय मे।

भोज्यासन प्रार्थना-

क्षीरोध तनये देवी कमले पद्म संभवे।

भोज्यासनम उपागम्यह्यतुलां प्रीतिमाश्रये।।*

श्रीः

श्री मते रामानुजाय नमः।

किरीटादि आभरण प्रतिष्ठा विधिः।

किरीटादि पादुकान्त प्रतिष्ठाकर्मसु प्रसूनांकुरपूर्वकं प्रतिसर बन्धन जलाधिवास(सद्यः)छायाधिवास नयनोन्मीलन पञ्चकलश स्नपनाधिकं तत्तद्वस्तूनामेव कारयित्वा। कुण्डे वा स्थण्डिले वा अग्निं विधिवत् प्रतिष्ठाप्य। वक्ष्यमाण क्रमेण तत्तदधिष्टितं देवं पूर्वं क्रमशो आवाह्य। उपकुम्भादिषु इन्द्रादीन् च करके सुदर्शनं आवाह्य।अर्घ्यादिभिः संपूज्य। अग्नौ भूषणादीनां अधिदेवतानां आवाह्य। अर्घ्यादिभिर्हुत्वा। तन्मन्त्रेण च समिदाज्य तिलेन लाजेन पृथक् पृथक् अष्टाविंशति संख्यया हुत्वा। प्रायश्चित्ताहुतिं पूर्णाहुतिं च कृत्वा। संपातं संगृह्य।न्यसेत्। पञ्च कलश स्नपनं कृत्वा।तद्भूषणं प्रादक्षिण्येन गृहीत्वा। ओं जितन्ते दक्षिणतो इति मन्त्रेण भगवन्तं समर्प्य।क्षीरगुळ पायसान्नं निवेद्य। नीराज्य।

किरीटस्य मूल मन्त्रः

ओं किरीटात्मानं भानुकोटि तिरस्कादिप्रभं मकुटाधिपं मूर्ध्नि दिव्य रत्नखचितं भगवत्किरीटं धारयन्तं ईश्वर तत्वाधिपाश्रयं भूतं दिव्य पुरुषं भगवत्किरीटादागतं

ओं किरीटाय ओं मकुटाधिपाय नमः।आगच्छा इत्यावाह्य। देवाय समर्पयेत्।

श्रीवत्सस्य मूल मन्त्रः।

ओं श्रीवत्सात्मानं हेम वर्णं सर्व मङ्गळेश्वरं मूर्ध्नि श्रियाप्रस्फुरित भगवल्लांछनं श्रीवत्सं धारयन्तम् प्रकृति तत्वादिभूतं दिव्य पुरुषं श्रीवत्सादागतम् ओं श्रीवत्साय नमः। इत्यावाह्य महा कुम्भे च पद्मकुण्डेन च एवमेवं आवाहन पूर्वकं सर्वं पूर्ववत् कृत्वा ।

कौस्तुभस्य मूलमन्त्रः।

ओं कौस्तुभात्मानं भास्कराभं सर्वरत्नाधिपं मूर्ध्नि भगवत्कण्ठ भूषणं कौस्तुभं धारयन्तं जीव तत्वाधारभूतं दिव्य पुरुषं भगवत्कौस्तुभादागतं ओं कौस्तुभाय रत्नाधिपतये नमः। आगच्छ। इत्यावाह्य।

अनन्तस्य मूलमन्त्रमाह

ओं रजताद्रिनिभं चतुर्भुजं हलमुसलधरं बद्धाञ्जलिपुटं सहस्त्र

फणामणि समुज्वलित उत्तमाङ्गं वारुणी कान्ता पत्नीभ्यां

समन्वितं भगवद्दर्शनाद्यानंद ब्रह्मित सर्वाङ्गं शब्दाधिदैवतं अनन्तं

ओं नागाधिराजाय ओं अनंताय नमः।इत्यावाह्य।

(पादुकाप्रतिष्ठायामपि एवमेव मन्त्रः)

ओं हं सहस्त्रफणाधृत चतुरश्र भूमण्डलाय अनंताय नमः।इत्यावाह्य अभ्यर्च्य । तस्य गायत्रि विषये।

ओं सहस्त्र फणाय विद्महे विष्णु तल्पाय धीमहि।

तन्नो अनन्तः प्रचोदयात्।

गरुडमूलमन्त्र आवाहन विषये क्षिप ओं स्वाहा।

अन्यत्र विषयाणि महोत्सवे गरुडप्रतिष्ठावत् कारयित्वा।

वैशेषिक मन्त्र विषये।

कनकाद्रि निभं चतुर्भुजं शङ्ख चक्र धृत कृताञ्जलि पुटं शंखाद्यहींद्र फणामाणिक्यैर्विराजिताङ्गं रुद्रा सुकीर्तिभ्यां पत्नीभ्यां समासीनं भगवद्दर्शनाद्यानंद पुळकांकितगात्रं वेदाधिदैवतं गरुडं ध्यायामि।

ओं क्षिपओं पक्षिराजाय ओं गरुडाय नमः।इत्यावाह्य।

तस्य गायत्रि।

ओं तत्पुरुषाय विद्महे सुपर्ण पक्षाय धीमहि।

तन्नो गरुडः प्रचोदयात्।

पक्षीशस्य अष्टाक्षर मन्त्र कल्पः।

अस्य श्री पक्षीन्द्र अष्टाक्षर महामन्त्रस्य। काश्यप ऋषिः।पङ्क्तिश्छन्दः।श्री पक्षिराजो देवताः।ओं बीजं।स्वाहा शक्तिः।पंकीलकं।क्षीं कवचं। द्रं अस्त्रं।परम व्योम क्षेत्रं।श्री पक्षीन्द्र प्रसादसिद्ध्यर्थे विनियोगः।ओं अस्त्रायफट् इति हस्ते शोधयित्वा।

करन्यासः।

ओं ओं ओं दक्षिणाङ्गुष्टेन तर्जन्यां।

ओं विं ओं दक्षिणाङ्गुष्टेन मध्यमायां।

ओं पं ओं दक्षिणाङ्गुष्टेन अनामिकायां।

ओं क्षीं ओं दक्षिणाङ्गुष्टेन कनिष्टिकायां।

ओं द्रां ओं वामाङ्गुष्टेन तर्जन्यां।

ओं यं ओं वामाङ्गुष्टेन मध्यमायां।

ओं नं ओं वामाङ्गुष्टेन अनामिकायां ।

ओं मः ओं वामाङ्गुष्टेन कनिष्टिकायां।

अथ देह न्यासः।

ओं ओं ओं खगेश्वराय ज्ञानाय हृदयाय नमः।

ओं विं ओं वैनतेयाय शिरसे स्वाहा।

ओं पं ओं गरुडाय शिखायै वषट्।

ओं क्षीं ओं पन्नगाशनाय कवचाय हुं।

ओं द्रां ओं नागान्तकाय नेत्राभ्यां वौषट्।

ओं यं ओं विष्णु रथाय अस्त्राय फट्।

ओं नं ओं सुपर्णाय हृदयाय नमः।

ओं मः ओं तार्क्ष्याय शिरसे स्वाहा।

ओं ओं ओं मध्यमया मूर्ध्नि मध्ये।

ओं विं ओं तर्जनी मध्यमाभ्यां नेत्रयोः।

ओं पं ओं अङ्गुष्टाऽनामिकाभ्यां मुखे।

ओं क्षीं ओं अङ्गुष्टतर्जनीभ्यां हृदये।

ओं द्रां ओं अङ्गुष्ट कनिष्टिकाभ्यां नाभौ।

ओं यं ओं अङ्गुष्टं विना गुह्ये।

ओं नं ओं तथैव जानुनी।

ओं मः ओं समस्ताङ्गुलीभिः चरणयोः।

साञ्जलि हस्तःगरुडं ध्यायेत्।

ओं नमो भगवते अनन्त कार्कोटक गुळिकपद्म महापद्मशङ्खपाल तक्षक अष्टकुल नागभूषणाय नागशोणित दिग्धाङ्गाय ओं नागान्तकाय नमः।

ओं पन्नगजाति कद्रूदेवि गर्वभञ्जनाय मात्रार्पित सत्यनाम्ने ओं गरुत्मते नमः।ओं वैनतेयाय नमः।

ओं क्षीराब्धि मथनाय चलरूप पीयूषप्रदेश नखलज सुरासुर संगरात्सुधा घटाऽपहारिणे तदा प्रमदावतार मादवायाब्द सुपर्ण नाम्ने ओं अमृतकुम्भ हस्ताय नमः।ओं विषहारिणे नमः।

ओं क्षीरोदमथनार्थं समादव मंदराद्रिधारिणे परमबलाड्याय परमपुरुषा ऽनुग्रहीताऽनन्त नाम्ने ओं खगेश्वराय नमः। ओंनागेन्द्र दर्प भञ्जनाय नमः।

ओं द्रुपगमनोद्युक्त पक्षविक्षेपणाय त्रैलोक्य क्षेमकराय त्रक्षत्रऋषि पुत्राय सप्त पाताळ वासिने ओं पन्नगाशनाय नमः। ओं तार्क्ष्याय नमः।

ओं यज्ञ पुरुष वाहनाय कण्ठ मूर्धान्त ऋग्यजुस्साम त्रयी तनु स्वरूपाय ब्रह्मरुद्रेन्द्र मूर्ति त्रय विग्रहाय ओं त्रयीमयाय नमः।ओंविष्णु रथाय नमः।

ओं नमःपक्षीन्द्राय विघ्नं नाशय नाशय विषंदारय दारय विषादि दोषाणि

ध्वंसय ध्वंसय भस्मीकुरु भस्मीकुरु हुंफट् स्वाहा।इति ध्यात्वा।

विष्वक्सेन प्रतिष्ठा विषये विशेषाणि।

सुवर्णाचल सन्निभं चतुर्भुजम् शङ्ख चक्र धारिणं ज्ञान तर्जनी अनर्घ रत्न खचित किरीटिनं ह्रीमति सूत्रवति पत्नीभ्यां सुखासीनं भगवत्कैंकर्य आनंद ब्रह्मित गात्रं गजाननादि गणाधिप नायकं विष्वक्सेनं विचिन्त्य। ओं वैकुण्ठ सेनान्याय ओं विष्वक्सेनाय नमः। इत्यावाह्य ।

विष्वक्सेनस्य गायत्रि।

ओं विष्वक्सेनाय विद्महे वेत्र हस्ताय धीमहि।

तन्नो शान्तः प्रचोदयात्।

मण्डपादीनां प्रतिष्ठा विषये।

अर्धमण्डपादि सहस्त्र स्तम्भ मण्डपान्तं विविध मण्डपासु प्रतिष्ठा काले तत्तन् मण्डपस्य पुरतः यागशाला कलश निर्माणानि कृत्वा।विधिवत् अग्निं प्रतिष्ठाप्य। कुम्भ दशकेषु आधारादि पद्मान्तं अभ्यर्च्य।मध्य कुम्भे ‘‘स्तम्भ संख्याऽनुगुण फणाग्रीव शाखान्वितं पद्मपत्रारुणेक्षणं कुण्डली कृत दीर्घ पृष्ठं विधृताञ्जलिम् रजताद्रि निभं अनन्तम् भगवच्चरणारविंदादागतम् ओं अं अनन्ताय नमः। इति ध्यात्वा।

एहिशेष बलाद्यक्ष फणामणि समुज्वल।

सान्निध्यं कुरु कुम्भेस्मिन् मण्डप प्रोक्षणावधि।

तस्य ध्यान विषये।

स्फटिकाद्रिप्रतीकाशं चतुर्बाहुं किरीटिनम्।

पूर्णचन्द्राननं सौम्यं सितपुष्पै र्विराजितम्।

लाङ्गलं मुसलं मुख्यकरयोर्दधतं शुभम्।
जघन्यकरयोश्शङ्खचक्रद्वंद्वम् यथा यथम्।
नीलांबरधरं दंष्ट्राकराळवदनैर्युतं।
प्रशान्तवपुषायुक्तं सहस्त्रफणमुन्नतम्।
फणामणि सहस्त्रांशु नीराजन विराजितम्।
अनन्तवक्र कुहरै रुद्वमन्तमुदार्चिषम्।
मण्डलीकृत नागेन्द्र भोगवेष्टन वेष्टितम्।
ध्याये दनन्तमुभयोःपार्श्वयो र्नागयोषिताः। (इति ध्यात्वा)
ओं क्षीरोदार्णव संभूतं सहस्त्र फण मौलिनम्।
हिमकुन्देन्दु दवळं नागराजं महामते। इति प्रार्थ्य।
उपकुम्भाऽष्टकेषु ओं वासुकिने नमः।ओं शेषाय नमः। ओं तक्षकाय नमः। ओं पद्माय नमः।ओं महापद्माय नमः। ओं शंखाय नमः।ओं गुळिकाय नमः।ओं कार्कोटकाय नमः।करके ओं सुदर्शनाय नमः। इत्यावाह्य अभ्यर्च्य।कुम्भादीन् संपूज्य।**हवनादीन् पूर्ववत् कृत्वा।**
अनन्तस्य गायत्रियाह।
ओं सहस्त्रफणाय विद्महे विष्णु तल्पाय धीमहि।
तन्नो अनन्तः प्रचोदयात्। इति समिदाज्य चरुणा अष्टोत्तरसहस्त्रं वा अष्टोत्तर शतं वा हुत्वा। पूर्णाहुतिं च कृत्वा। " सहस्त्रशीर्षदेवं " इत्यादिमन्त्रेण प्रोक्ष्य। पादुकाप्रतिष्टायामपि एवमेव कृत्वा।मण्डपस्य प्राणप्रतिष्ठा काले ।
"विष्णु बिम्ब निवेशार्थं मण्डपं कल्पिते मया।
वितानरूपमासाद्य मण्डपे सुस्थिरो भव।"
इति विज्ञाप्य। इति मण्डप प्रतिष्टाविधि संग्रहः।

अथ वाहनादीनां प्रतिष्ठा विधिःउच्यते।

सिम्हासने शेषपीठे डोलायां शयने तथा।
दीपस्तम्भे विताने च छत्रे शेषं समर्चयेत्।
इत्युक्तरीत्या आसीन शयन योग्यवस्तुषु अनन्तं आवाह्य।
ध्रुवे फणीन्द्रं आवाह्य ऊर्ध्वे तु विहगाधिपम्।

इत्युक्तवत् ध्रुवनामपि शेषं पूर्वोक्तवत् प्रतिष्ठाप्य। भगवन्तं समर्प्य।

अन्यत्र वाहनादीनां प्रतिष्ठाकाले वैशेषिकः।

सूर्यप्रभा विषये

कालात्मकं द्विभुजं पद्महस्तं विद्युल्लताभं द्विनेत्रं हारीत सप्ताश्व सप्त रज्जुं एकचक्र स्वर्ण रथमारूडं गृहाधीशं सूर्यम् रविमण्डलात् ध्यायामि।ओं हं सूर्याय नमः। इत्यावाह्य प्रतिष्ठाप्य।भगवन्तं समर्प्य।

चंद्रप्रभा विषये

कालात्मकं द्विभुजं इन्दीवरकरं रजत विद्युल्लताभं द्विनेत्रं पाण्डर दशाश्व दश रज्जुं चक्र त्रय रथारूढं नक्षत्राधीशं चंद्रमण्डलात् ध्यायामि। ओं वं चंद्रमसे नमः। इत्यावाह्य प्रतिष्ठाप्य। भगवन्तं समर्प्य।

हनुमद्वाहन विषये

कनकाचल सन्निभं द्विभुजं कृताञ्जलिं मुक्तादामविभूषितं मेरुतटरंभावन मध्यस्थितं पारिजात वृक्ष मूल बद्धावासं सीताराम कैंकर्य सेवा तत्कथाश्रवण पुळक स मेघमान गात्रं हनूमन्तं ध्यायामि।ओं वानर पुंगवाय ओं हं हनुमते नमः।इत्यावाह्य प्रतिष्ठाप्य। भगवन्तं समर्प्य।।

अन्यत्र वाहनादीनां विषये

भद्रपीठे पादुकायां शिभिकायां ध्वजे तथा।

गजाश्वयोः रथे सिम्हे हम्से तार्क्ष्यं तु पूजयेत्।

वाहनानां च सर्वेषां गरुत्मानेव देवताः।

इत्युक्तवत् पूर्वोक्त वाहनादीनामपि गरुत्मन्तं आवाह्य।प्रतिष्ठाप्य।भगवन्तं समर्प्य।

इति वाहनादीनां प्रतिष्टाविधिः संग्रहः।

श्रीः

श्रीमते रामानुजाय नमः।

रथ प्रतिष्ठा विधिः

अथ रथ प्रतिष्ठा विधिःउच्यते। आचार्यः नित्यकर्मादिकं कृत्वा। भगवन्तं संपूज्य।रथशालां प्रविश्य।तक्षकं सदक्षिणेन संतुष्य।रथं शुद्धजलेन संक्षाळ्य।पुण्याह जलेन प्रोक्ष्य।सिद्धार्थान् विकीर्य।

रथप्रतिष्ठा काल निर्णयः।

उत्तरायण कालेतु दक्षिणायणमथापि वा।

प्रशस्तपक्षे नक्षत्रे सुमुहूर्ते सुलग्नके।

रथ संपन्न काले तु रथस्थापनमाचरेत्।

कर्तव्य कार्य क्रमाणि।

प्रथमं चांकुरं प्रोक्तं द्वितीयं जलवासनम्।

अक्षिमोचंतृतीयं तु चतुर्थं स्थापनं तथा।

पञ्चमंचाऽधिवासं तु षष्टंचाऽग्निपूजनम्।

शान्तिहोमं सप्तमं च पूर्णाहुतिरथाऽष्टमम्।

स्थापनं नवमं प्रोक्तं दशमं न्यास उच्यते।

दक्षिणां च ततःप्रोक्तं द्वादशं अधिरोहणम्।

एवमेव प्रकारेण रथस्थापनमाचरेत्।

रथप्रतिष्ठायां फलानि।

रथं संस्कारसंयुक्तं सर्वकाम फलप्रदम्।

तस्मात्सर्वप्रयत्नेन संप्रोक्षणमथाचरेत्।

इत्युक्तवत् रथप्रतिष्ठा दिनस्य सप्तमे पञ्चमेदिने त्रितीयेदिनात् पूर्वे वा सद्यो वा अङ्कुरार्पणमाचरेत्।

जलाधिवासविधिः

जलाधिवासार्थं रथस्य पूर्वभागे चतुस्तम्भ प्रपां कारयित्वा। तन्मध्ये धान्यपीठं निक्षिप्य। तस्योपरि कटाहं सुगन्ध जलेन संपूर्य। ब्रह्म कूर्चं निक्षिप्य। दर्पणं च स्थापयित्वा। अधिवास कुम्भस्य परितः अष्टकुम्भान् संस्थाप्य। मध्यकुम्भे क्षीरार्णवं ध्यात्वा। रथच्छायां निमज्य। उपकुम्भाऽष्टकेषु अष्ट विघ्येश्वरान् आवाह्या। पूर्वादिषु ओं वराहाय नमः।ओं नारसिम्हाय नमः। ओं श्रीधराय नमः। ओं

हयग्रीवाय नमः।आग्नेयादिषु। ओं परशुरामाय नमः।ओं रामाय नमः।ओं वामनाय नमः। ओं वासुदेवाय नमः।इत्यावाह्य अभ्यर्च्य।

रथस्य महाङ्ग उपाङ्ग क्रममाह।

पादौ तु पाद चक्रं तु जानुदेशं तु कीलकम्।
ऊरूचैव तलं प्रोक्तं वितलं कटिदेशकम्।
त्रितलं नाभिदेशं तु चतुर्थंचोदरं तथा।
पञ्चमं हृदयस्थानं स्तम्भाद्यादि करं तथा।
लोहस्थानं भुजं चैव कण्ठदेशं तु कंदरम्।
शेषास्तु मुखमित्युक्तं शिरस्थानं तु पद्मकम्।
कलशं मौलिरित्युक्तं महाङ्गं स्यन्दनस्य तु।
उपाङ्गमधुना वक्ष्ये समाहित मना श्रुणु।
नासां च सिम्हभद्रं च श्रोत्रे चैव ध्वजं तथा।
शालाश्च चक्षुरित्युक्तं रेखास्याद्रोम कूपकम्।
अपानं शुषिरं चैव गुह्यस्थानं तु संधिषु।
आयसं चाऽस्थिरित्युक्तं ताम्रं मांसं च बुद्धिमान्।
रुधिरं वर्णमित्युक्तं जीवं स्याद् विहगेश्वरम्।
रथं च गरुडं ध्यात्वा तत्वादीन् उपसंहरेत्।

पृथिवी अप्सु प्रलीयते। आपस्तेजसी लीयते। तेजो वायौ लीयते। वायुराकाशे लीयते। आकाशं अव्यक्ते लीयते। अव्यक्तंअक्षरेलीयते। अक्षरं तमसि लीयते। तमःपरे देव एकी भवति ।इत्यादि संहार न्यासं कृत्वा।कुशेन च नववाससा''युवासुवासा...इति मन्त्रेण आच्छाद्य।''उदुत्तमं.. इतिमन्त्रेण दर्भमाल्या संवेष्ट्य।'.ऋतंच..इति मन्त्रेण रथच्छायां कूर्पर स्थाने निमज्य।''चरणं पवित्रं.. इति मन्त्रेण रक्षां कुर्यात्।इति रथस्यजलाधिवास:
(छायाधि वास) विधिः।

कुम्भस्थापन पूजाविधिः

रथस्य दक्षिण दिग्भागे प्रपां कल्पयित्वा।मध्य वेदिकायां धान्य पीठे दशकलशान् संस्थाप्य। गन्धोदकेन संपूर्य। एलालवंगादीनि निक्षिप्य। शोषणादीनि कृत्वा।स वस्त्र आम्र पल्लवानि

निक्षिप्य।षड्ङिव्वशद्दर्भकृत कूर्चं निधाय। उपकुम्भादीन् च पूर्ववत् अलंकृत्य। सर्वत्र सप्तदर्भकृत कूर्चं निक्षिप्य। वेदिकायां ओं भूलोकाय नमः। ओं भुवर्लोकाय नमः। ओं सुवर्लोकाय नमः। ओं महर्लोकाय नमः।ओं जनोलोकाय नमः।ओं तपोलोकाय नमः। ओं सत्यलोकाय नमः। इत्यावाह्य अभ्यर्च्य।दर्भमालायां ओं वासुखिने नमः।मण्डपस्य उपरि ओं चक्राय नमः। भूमौ ओं पद्मायै नमः। विताने ओं सोमाय नमः।सर्वत्र आधारादि पद्मान्तं संपूज्य। मध्यकुम्भे

कनकाद्रिनिभं चतुर्भुजं शङ्खचक्रधृत कृताञ्जलिपुटं, शंखाद्यहीन्द्र फणा माणिक्यै र्विराजिताङ्गं, रुद्रा,सुकीर्तिभ्यां पत्नीभ्यां समासीनं, भगवद्दर्शनाद्यानन्द पुळकांकित गात्रं, वेदाधिदैवतम्, ओं क्षिप ओं पक्षिराजाय ओं गरुडाय नमः। इत्यावाह्य।वैनतेयादि प्रतिमां च कुम्भे निक्षिप्य।''ओंसुपर्णोसि...इति मन्त्रं गरुडगायत्रीं च जपित्वा। अस्त्रकुम्भे सुदर्शनं, अन्यत्रकुम्भेषु अष्टविद्येश्वरान् आवाह्य।अन्यत्र कुम्भे रथाऽधिष्टित सर्वेषां देवतां च स्यन्दनस्थित देवतानां च आवाह्य। अभ्यर्च्य।

यागशालायां हवन विधिः

महोत्सवोक्तवत् चतुष्कुण्ड कल्पने पूर्वादिषु कुण्डेषु ओंनमोभगवते सुपर्णाय नमः। चापे ओं नमोभगवते गरुडाय नमः। वृत्त कुण्डे ओंनमोभगवते वैनतेयाय नमः। त्रिकोणकुण्डे ओं नमोभगवते तार्क्ष्याय नमः। इत्यावाह्य अभ्यर्च्य।समिदाज्य चरुणा तत्तन्मूल मन्त्रेण हुत्वा। सम्पाताज्येन संस्पृश्य। कुम्भस्य परितः;रथस्य परितः च पूर्वादिषु''देवव्रतसामं ..।दक्षिणे''बृहत्सामं..।पश्चिमे''यज्ञा यज्ञिय...। उत्तरे''रथन्तरं...सामं च पठित्वा। पूर्णाहुत्यनंतरं रथस्य वस्त्रं च दर्भमालां च व्यपोह्य।सर्वत्र अक्षिमोचनं पूर्ववत् कारयित्वा। गोपृष्टादीनि प्रदर्श्य। नीराज्य।

छायाधिवास जलाधिवासे आवाहित उपकुम्भ देवतान् तत्तत्स्थाने उद्वास्य।रथस्य अङ्ग प्रत्यङ्गानि गतागतं संवीक्ष्य। शिल्पिणा धृडीकृत्य।मध्यकुम्भ जलेनैव प्रोक्ष्य।रथस्यसृष्टिन्यासं गरुड पञ्चाक्षरेणकारयेत्। अङ्ग पूजनं तत्वन्यास

होमवत् कारयित्वा। रथशुद्ध्यर्थं महोत्सववत् षोडशकलश स्नपनं वा; नवकलशेन वा अभिषेचनं कृत्वा।

रथस्य अङ्गन्यास विधिः

चक्र दण्डाधि दैवतायै ओं मायायै नमः। चक्राधि दैवताय ओं सूर्याय नमः।ओं चंद्राय नमः। मध्य दण्डाधि दैवताय ओं ह्रीं आधारशक्त्यै नमः। ओं चतुर्वेद रूपाय नमः। पट्टिकायां ओं दशावतार मूर्तिभ्यो नमः। गात्रेषु सर्वेषु ओं विहगाधिपाय नमः। गात्र मध्यान्तरे ओंसत्वगुणाय नमः। ओं नमः। ओं रजो गुणाय नमः। ओं तमो गुणाय नमः। ओंसप्त मारुतेभ्यो नमः। स्थूपिकाधिपाय ओंहरये नमः। चतुर्दिक्षु ओं वराहाय नमः।ओं नारसिह्माय नमः। ओं श्रीधराय नमः।ओंहयग्रीवाय नमः। अश्वाणामधिपाय ओं चतुर्वेदाय नमः।मध्ये ओं वरुणाय नमः।ओं अग्नये नमः।ओं वायवे नमः। युगेषु ओं विहगेन्द्राय नमः।सारथ्याधिपाय ओं ब्रह्मणे नमः।

प्रथमावरणे। ब्रह्मासनस्य परितःओं शङ्खिणे नमः। ओंचक्रिणे नमः।ओं गदिने नमः। ओं पद्मिने नमः।ओं मुसलिने नमः। ओं खड्गिणे नमः। ओं शार्ङ्गिणे नमः। ओं वनमालिने नमः। इत्यावाह्य अभ्यर्च्य।

द्वितीयावरणे देवासनस्य परितः।ओंकुमुदाय नमः।ओं कुमुदाक्षाय नमः। ओं पुण्डरीकाय नमः। ओं वामनाय नमः। ओं शंकुकर्णाय नमः। ओं सर्वनेत्राय नमः। ओं सुमुखाय नमः। ओं सुप्रतिष्टाय नमः। इत्यावाह्य अभ्यर्च्य।

त्रितीयावरणे मानुषासनस्य परितः। ओं धात्रे नमः।ओं विधात्रे नमः। ओं मित्राय नमः। ओं वरुणाय नमः। ओं भगवते नमः।ओं वैवस्वते नमः। ओं तूष्णे नमः। ओं सवित्रे नमः। ओं रवये नमः। ओं त्वष्ट्रे नमः। ओं सूर्याय नमः। ओं विष्णवे नमः। इत्यावाह्य अभ्यर्च्य।

षोडशस्तम्भानामधिपाय ओं धर्मादीनां, अधर्मादीनां च आवाह्य। अभ्यर्च्य। प्रथमाधार पङ्क्तिषु नरोत्तमादीन् आवाह्य। द्वितीये मत्स्यादि मूर्ति,त्रितीये केशवादींश्च आवाह्य। आधार पीठिकासु कोणेषु ओं सत्याय नमः।ओं सुपर्णाय नमः। ओं विहगेशाय नमः।ओं तार्क्ष्याय नमः।इत्यावाह्य। सर्वत्र आधारे ओं हं सहस्त्रफणाधृत चतुरश्र भूमण्डलाय

अनंताय नमः। तस्मिन् अधो भागे ओं ऋौंम् ष्ट्रूं कालपावक कूर्माय नमः। सर्वत्रोपरि ध्वजाधिपाय ओं क्षं गरुडायनमः। आतपत्रे ओं हं अनन्ताय नमः। इति होमः न्यासं च कृत्वा। पूर्णाहुतिं कृत्वा। तथः प्रभाते आचार्यः कृतकृत्यः यागशालां प्रविश्य। विधिवत् कुम्भादि पूजनं, अग्निसंतर्पणादीन् कृत्वा। पूर्णाहुत्यनंतरं अग्निस्थं गरुडं महाकुम्भे उद्वास्य। यात्रादान पुरस्सरं महाकुम्भं उत्थाप्य। स वेदवाद्य

घोषैःसह रथ शालां प्रविश्य।''प्रतिष्ठासी ति साम्ना उपकुम्भजलेन महाकुम्भेन सह प्रोक्ष्य। मध्य कुम्भस्थं गरुडं रथे आवाह्य। प्राणप्रतिष्ठादीन् कृत्वा। तदनंतरम्।

प्रतिष्ठाऽनन्तरंदशद्रव्यदर्शन विधिः

प्रथमं पञ्च गव्यञ्च द्वितीयं घृत दर्शनम्।
तृतीयं क्षीर कुम्भञ्च चतुर्थं गज दर्शनम्।
पञ्चमंचाऽष्टधान्यञ्च धेनुवत्सञ्च षष्टकम्।
सप्तमं कन्यकानांतु श्वेताश्वञ्चाऽऽष्टकम् भवेत्।
नवमं दर्पणंप्रोक्तं दशमं कृष्णमर्कटम्।
एकादशं तु भक्तानां द्वादशं नृत्त गीतकम्।
यजमानाः त्रयोदश्यां दर्शयित्वा यथाक्रमम्।
दशजन्मार्जितं पापं तत्क्षणादेव नश्यति।
इत्येवं दर्शनात्पुण्यं महा पातक नाशनम्।

इत्यादि वस्तूनि गरुडस्य तस्य हृदये वस्तव्य अनिरुद्धाय च दर्शयित्वा। महाहवि र्निवेद्य। प्रभूत बलिं च कारयेत्। लोकपालान् पूजयित्वा। नीराज्य। महदाशीर्वाद पुरस्सरम् आचार्य सम्मानादीन् कृत्वा। शुभेमुहूर्ते भगवन्तं आरोप्य। गुळान्नं निवेद्य। अन्यत्र भूसुराणां संतोषणार्थं यात्रादान ग्रहप्रीति दशदान षोडशदानादीन् कारयेत्। वीथिभ्रमणं कृत्वा नीराज्य।

इति रथप्रतिष्ठा विधिः संग्रहः।

मत्स्यादि मूर्ति प्रतिष्ठा विधिः

अथ मत्स्यादि मूर्ति प्रतिष्ठा विधिरुच्यते। सर्वं पूर्ववत् कृत्वा। महाकुम्भस्य आवाहन काले क्षीरार्णवावृत श्वेतद्वीपं ध्यात्वा। तत्र रत्नोज्वलित धर्मानन्दाख्य वैकुण्ठ दिव्य नगरे मणिमय मण्डप मध्ये शेषतल्प शायिनं किरीट श्रीवत्स कौस्तुभ वनमालाद्याभरण परिष्कृतं पद्म चक्र शङ्ख गदा शोभित चतुर्भुजं पीतांबरावृत कटि प्रदेशे शोभित नन्दकं धर्म संस्थापणार्थं वासुदेवादि चातुव्यूहादाविर्भूतं षाड्गुण्य विग्रह विभवावतार मूलं सनक सनातनादि योगिबृंद वन्दितं जय विजयादि द्वारपालकैःसेव्यमानं श्री भू सहितं पद्मनाभं भगवन्तं ध्यात्वा। मानसाराध्य। पद्मनाभादाविर्भूतं विमानारूडम् विभवार्चां बिम्बादाविर्भूतं भगवन्तं सूर्य मण्डले ध्यात्वा। पूर्ववत् सूर्य मण्डलात् मध्य कुम्भादिषु चाऽऽवाह्य। प्रतिसरं कुर्यात्।

व्यूहांशजः पद्मनाभः श्रीभूमिभ्यां समन्वितः।
चतुर्भुजः शङ्ख चक्र गदाचाप विभूषितः।
शयानमित्थं देवेशं विभवस्यादिकारणम्।
ध्यात्वैवं पुण्डरीकाक्षं ततः कुम्भे समर्चयेत्।
इत्यावाह्य अभ्यर्च्य। अन्यत्सर्वं पूर्ववत् कृत्वा।।
इति मत्स्यादि मूर्ति प्रतिष्ठा विधिःसंग्रहः।

****

श्री हनुमत् प्रतिष्ठा विधिः

श्री राघवं दशरथात्मजमप्रमेयं सीता पतिं रघु कुलान्वय रत्न दीपं ।
आजानु बाहुमरविन्द दळाय ताक्षं रामं निशाचर विनाशकरं नमामि ।
यत्र यत्र रघुनाथ कीर्तनं ।तत्र तत्र कृत मस्तकाञ्जलिम् ।।
बाष्प वारि परि पूर्ण लोचनं ।मारुतिं नमत राक्षसान्तकम्।।

श्री नारायण सम्हितोक्त हनुमत्प्रतिष्ठा विधिरुच्यते।

अधाथ स्सम्प्र वक्ष्यामि प्रतिष्ठां च हनूमतः।

मुहूर्त विशेषः

वैशाखे श्रावणे चैव पुष्य मासे तु कार्तिके।
आषाढे तु तुलामासे प्रतिष्ठां च विशेषतः।
पुण्य क्षेत्रे विष्णु क्षेत्रे रोहिण्यां अश्विनौ तथा।
शुक्लपक्ष द्वितीयायां पञ्चम्याञ्च विशेषतः।
एकादश्यां च द्वादश्यां त्रयोदश्यां विशेषतः।
वायु सूनो प्रतिष्ठायां मन्द वारे सुशोभितं।
रविवारे भृगोर्वारे सोमे वापि प्रकल्पयेत्।
शुभे मुहूते कर्तव्यं विषनाढ्यां विवर्जयेत्।

दिन विकल्पः

दिनत्रयं वा एकं वा पञ्च सप्त च येव वा।
शिल्प शास्त्र प्रकारेण निर्मितं बिम्बमाहरेत्।

दश दानादिभिर्विप्रान् तृप्तान् कुर्यात् सु शोभनं।
अष्ठबन्ध प्रकारेण स्व स्थाने स्थापयेत् क्रमात्।
आगमोक्त प्रकारेण यथा विभव विस्तरम्।
प्रतिष्ठा मारुतेः कुर्यात् शास्त्र मार्गेण देशिकः ।
मत्सन्निधौ समीपे च मण्टपे च विशेषतः ।
वास्तु मध्ये विशेषेण गोपुरद्वार एव च।
ग्रामे वा नगरे वापि पत्तने राजधानिके।
मार्गे वा मार्ग वृक्षादौ मार्ग मण्टप मध्यमे।
भगवत्प्राङ्मुखे चैव आञ्जनेयं संस्थापयेत्।
वायु पुत्रस्य पुरतः सारङ्गंबलि पीठके।

प्रतिष्ठा कार्य क्रमाणि

पुण्याहवाचनं कुर्यादनुज्ञां देशिकोत्तमः।
मृत्सङ्ग्रहण मारभ्य अङ्कुरार्पण माचरेत्।
वास्तु शान्ति ततःकृत्वा रक्षा बन्ध पुरस्सरं।
पञ्च गव्य प्रोक्षणञ्च पर्यग्नि करणम्तथा।
धान्याधि वासनम्चैव जलाधिवासमेव च।
छाया स्नपन पूर्वञ्च नयनोन्मीलनं तथा।
शयनाधिवासम्चैव कूश्माण्ड गणहोमकं।
अष्ठबन्धन पूर्वन्तु प्रतिष्ठां कारयेत्तथा।
ओं अपराजित पिङ्गाक्ष नमस्ते देवपूजित।
भवतः प्रोक्षणम् कर्तुं अनुज्ञां देहि मे प्रभो।
इति प्रार्थ्य।
पूर्वोक्तवत् द्वार तोरण निर्माणं कुर्यात्।
। द्वारपूजा विधिरुच्यते। १. पूर्वे अश्वत्थ तोरणे ओं ऋग्यूपाय नमः। रक्त ध्वजयोः ओं नलाय नमः। ओं नीलाय नमः । कुम्भयोःओं कुण्डोधराय नमः। ओं बलवन्ताय नमः। इत्यभ्यर्च्य।
२ दक्षिणे औदुम्बर तोरणे ओं यजुर्वेदाय नमः। पीत ध्वजयोः

ओं कुमुदाय नमः। ओं गवये नमः। कुम्भयोः ओं बुद्धिमन्ताय नमः ।
ओं नीतिमन्ताय नमः। इत्यभ्यर्च्य।
३. पश्चिमे न्यग्रोध तोरणे ओं साम वेदाय नमः।कृष्ण ध्वजयोः ।
ओं शरभाय नमः। ओं ताराय नमः। कुम्भयोः ओं धैर्य वन्ताय नमः ।
ओं स्थैर्य वन्ताय नमः । इत्यभ्यर्च्य।
४. उत्तरे प्लक्ष तोरणे ओं अथर्व वेदाय नमः। श्वेत ध्वजयोः
ओं पवनाय नमः। ओं गवये नमः। कुम्भयोः ओं शौर्य वन्ताय नमः।
ओं पराक्रमवन्तायनमः।इत्यावाह्य अर्घ्यं गन्ध पुष्प धूप दीपादीन् समर्प्य ।।

कुम्भ पूजन आवाहन विधिः

महा कुम्भस्य वेदिकासु धान्य पीठं निधाय। तदुपरि सूत्र वेष्ठित स लक्षण घटान् सम्स्थाप्य। गन्ध जलेन सम्पूर्य। शोषणादीनि कृत्वा।मध्य कुम्भादि घटेषु आधारादि पद्मान्तं अभ्यर्च्य। धूप दीपं समर्प्य ।आवाहन पात्रे ओं नमोभगवते हनुमते पीताम्बर धराय कर्णकुण्डलाऽलङ्कृताय किरीट तुळसी वनमाला विभूषिताय कनक यज्ञोप वीताय कटिसूत्र विराजिताय श्री रामचन्द्राऽभिलाषाय लङ्का पुरी दाहन कारणाय दानव कुलगिरि वज्र चण्डाय अक्षय कुमार सम्हारकाय ओं यं इं घ्रों ओं नमोभगवते रामदूताय हनुमते हुं फट्;स्वाहा।अस्मिन् आवाहनपात्रे आगच्छाऽऽगच्छ इत्यावाह्य। आवाहन पात्रात् अस्मिन् कुम्भे आवाहयामि। इति पुष्पाक्षत तोयान् समर्प्य आवाहनादि षण्मुद्रान् प्रदर्श्य। ओं हां इति षडङ्गन्यासं कृत्व। अर्घ्यादिभिः सम्पूज्य। उप कुम्भादिषु ओं लं इन्द्रय नमः इत्यारभ्य ईशानाय नमः। करके ओं भीम सेनाय नमः।इत्यभ्यर्च्य।अर्घ्यादिभि स्सम्पूजयेत्।

हवन विधिरुच्यते

विधिवत् अग्निं प्रतिष्ठाप्य। तदग्नौ पूर्ववत् आधारादि पद्मान्तं हुत्वा।
तन्मध्ये हृदब्जात् पूर्व आवाहित मूलमन्त्रेण आवाह्य। अर्घ्यादि
नैवेद्यान्तं सकृत्सकृत् आज्येन हुत्वा। पुनः समिदाज्य चरुभिः
अष्टोत्तर शतं वा अष्टा विम्शतिर्वा अष्टाहुतिर्वा वक्ष्यमाण मन्त्रेण हुत्वा।
ओं आञ्जनेयाय विद्महे वायु पुत्राय धीमहि।
तन्नोहनुमत् प्रचोदयात्।इति ओं हरि मर्कट मर्कटाय स्वाहा। इति
ओं मर्कटेश महोत्साहो सर्व क्षुद्रनिबर्हण। शत्रून्; सम्हर मां रक्ष श्रियं

दापय देहि मे स्वाहा। इति मन्त्रेण हुत्वा।पुरुषसूक्तेन चरुणा षोडशाहुतीर्हुत्वा। स्विष्ट कृद्हवनञ्च कृत्वा। शान्तिमन्त्रचतुष्टयेन पञ्चोपनिषन्मन्त्रेण च हुत्वा। पूर्णाहुतिं कृत्वा।सम्पाताज्येन महाकुम्भे न्यस्य। नीराज्य।

तत्वन्यास होमविषये विशेषः

अद्य पूर्वोक्त एवंगुण विशेषण विशिष्टायां अस्यां श्री हनुमत्प्रतिष्ठा काले बिम्बस्य अप्राकृतत्व सिध्यर्थं तत्वन्यास होमं करिष्ये तदनन्तरं अङ्ग मन्त्रेण हवनञ्च करिष्ये। इति सङ्कल्प्य।अङ्ग मन्त्र होमविधिः। एतन्मन्त्रेण होमकाले स्वाहा इति न्यसन काले नमः इत्युक्त्वा। सम्पाताज्येन तत्तत्स्थाने स्पर्शयित्वा।

ओं हनुमते नमः। पादौ पूजयामि।

ओं सुग्रीव सचिवाय नमः।गुल्फौ पूजयामि।

ओं अङ्गद प्रियाय नमः।ऊरुं पूजयामि

ओं अक्षोभ्याय नमः कटिं ।पूजयामि

ओं लङ्का दाहनाय नमः वालम्पूजयामि।

ओं राम मणिदाननाय नमः।नाभिं पूजयामि।

ओं सागरोल्लङ्घनाय नमः। मध्यमं पूजयामि

ओं लङ्का मर्दनाय नमः। केशावळिं पूजयामि।

ओं सञ्जीवन नखाहत्रे नमः। स्थनौ पूजयामि

ओं सौमित्री प्राणधाय नमः ।वक्षं पूजयामि ।

ओं कुण्ठित दश कण्ठनाय नमः।कण्ठं पूजयामि।

ओं रामाभिषेक कारिणे नमः। हस्तौ पूजयामि

ओं मन्त्ररचित रामायणाय नमः। वक्रं पूजयामि।

ओं प्रसन्नवदनाय नमः। वदनं पूजयामि।

ओं पिङ्गनेत्राय नमः।नेत्रौ पूजयामि।

ओं श्रुतिपारगाय नमः। श्रोत्रे पूजयामि।

ओं ऊर्ध्वपुण्ड्रधारिणे नमः ।कपोलं पूजयामि।

ओं मणिकण्ठमालिने नमः। शिरः पूजयामि।

ओं सर्वाभीष्ट वरप्रदाय नमः। सर्वाङ्गं पूजयामि।.

इति मन्त्रेण स्वाहाकारेन हुत्वा । सम्पातेन न्यस्य।

नव कलशेन पञ्च कलशेन वा अभिषिच्य।पूर्णाहुतिं च कृत्वा।सुमुहूर्ते हनुमन्तं प्रतिष्ठापयेत्।

महाकुम्भात् मूलभेरे आवाहन विधिः

सुमुहूर्ते महाकुम्भं उपकुम्भेन सह गर्भ गृहं प्रविश्य।धान्य पीठे विनिवेश्य।मूल बेरस्य पादयोः योगपीठार्चनं कृत्वा। आवाहन पात्रे महाकुम्भस्य तोयं गृहीत्वा।तुळसीं निक्षिप्य। तत्तीर्थे

ओं कनकाचल सन्निभं द्विभुज कृताञ्जलिं मुक्ता धाम विभूषितं

मेरुतटरं भावन मध्ये स्थित पारिजात वृक्ष मूल बद्धावासं सीताराम

कैङ्कर्यसेवा तत्कथा श्रवणाऽऽनन्द समृद्ध पुल्कस मेघमान गात्रं

हनूमन्तं ध्यात्वा। ओं वानर पुङ्गवाय ओं हनुमते नमः आगच्छऽऽगच्छ इत्यावाह्य ।देवस्य मूर्ध्नि सत्तोयं तुळस्या सह समर्प्य । आवाहनादि षण्मुद्रां प्रदर्श्य। महाकुम्भस्य यच्छक्तिम्मूलभेरे विचिन्त्य।

पारिजात तरोर्मूलं वासिनं वनवासिनं।

पश्चिमाभिमुखं बालं हनूमन्तं उपास्महे।

इति ध्यात्वा। ओं हां इत्यादि षडङ्गन्यासं कृत्वा।

हनूमन् अंजनी सूनो रामपादब्ज षद्पद।

वायुपुत्र नमतेस्तु सान्निध्यं कुरु सर्वदा। इति

स्वामिन् सर्व जगन्नाथ यावच्चन्द्र दिवाकरौ।

तावत्वं भक्तिभावेन बिम्बेस्मिन्सन्निधिं कुरु। ।इति च सान्निध्यं प्रार्थ्य। प्राणप्रतिष्ठां कृत्वा।

ओं इति ब्रह्मरन्ध्रं पिधाय।अर्घ्यादिभिस्सम्पूज्य नानाविध भक्ष्य भोज्यानि नैवेद्य।उप कुम्भादि देवतानां पादाग्रे विनिवेशयेत्।

इति हनुमत्प्रतिष्ठा विधिः ।

श्रीमते रामानुजाय नमः

भक्तबिम्ब प्रतिष्ठाविषये संग्रह विधिः

भक्तानां स्थापनं कुर्यात् चतुर्थाऽऽवरणादिषु।
सिह्म दिङ्मूर्ति रहितं मन्दिरं परिकल्पयेत्।
स्वस्व वर्णाश्रमाचारान् सदृशाकृति चेष्ठितान्।
प्रकल्प्य भक्त बिम्बादीनां मन्दिरे मानुषेपदे।
सम्स्थाप्य पद्मनाभस्य चरणाम्बुज पीठतः।
सम्प्रार्थ्य दिव्यजीवम् तं कुम्भ मध्ये विचिन्तयेत्।
नोपकुम्भाष्ठकं नैव शैय्यायां अधिवासनम्।
सर्वं अन्यद्यथा पूर्वं प्रोक्षणान्तं समाचरेत्।
तत्तच्छिष्यान् पादुकायां चिन्तयेदब्धि सम्भवे।
इत्युक्तवत् भक्तबिम्बस्य विग्रहं आलयं च यथाविधिः कल्पयित्वा।वक्ष्यमाण क्रमेण भक्त बिम्ब प्रतिष्ठांकारयेत्।
१ स्वयं व्यक्त दिव्य आर्ष अर्चाभगवतः चरणाद्वा,
२परमधाम, क्षीरार्णवेमध्यस्थित नारायणस्य चरणाद्वा,
३सूर्यमण्डल मध्यस्थित भगवत्पादाम्बुजाद्वा मध्य कुम्भे आवाह्य।
आवाहन मन्त्रः।
ओं मं नमःपराय ओं परम हंसाय ओं दिव्य जीवाय नमः। आग्च्छागच्छेति आवाह्य। तद्विषये।
ओं मं हंसः श्री शठगोपाय नमः।
ओं मं हंसः श्री मधुरकवये नमः।
ओं मं हंसः श्री भूतनाथाय नमः।
ओं मं हंसःश्रीसरोयोगिने नमः।
ओं मं हंसःश्रीवेताळ्योगिने नमः।
ओं मं हंसःश्री भट्टनाथाय नमः।
ओं मं हंसःश्रीमहीसाराय नमः।
ओं मं हंसःश्री कुलशेखराय नमः।

ओं मं हंसःश्रीयोगिवाहनाय नमः।

ओं मं हंसःश्री भक्ताङ्घ्रिरेणवे नमः।

ओं मं हंसःश्री परकालाय नमः।

ओं मं हंसःश्री यतिराजाय नमः।

ओं मं हंसःश्री वरवरमुनये नमः।

ओं मं हंसःश्री वेदान्त गुरवे नमः।

इत्यादिभिः आवाह्य। शेष प्रतिष्ठापन कार्याणि पूर्वोक्तवत् निर्वर्त्य। प्राणप्रतिष्ठा समये हे हंस हे जीव भगवच्चरणाम्बुजात् आगच्छ इति सप्त वारमुक्त्वा। आवाहन पात्रमागतं दिव्यशक्तिं दिव्य बिम्बे ध्यायामि।आवाहनादि षण्मुद्रा प्रदर्शन नैवेद्य नीराजनान्तं कृत्वा।

परांकुश गायत्रि

ओं परांकुशाय विद्महे शठकोपाय धीमहि।

तन्नो मारः प्रचोदयात्।

ओं श्रीं शं शठकोपाय नमः।

कलियन् गायत्रि

ओं परकालाय विद्महे परभक्ताय धीमहि।

तन्नो नीलः प्रचोदयात्।

ओं ह्रीं पं परकालाय नमः

श्री रामानुज गायत्रि

ओं रामानुजाय विद्महे यतिराजाय धीमहि।

तन्नो शेषः प्रचोदयात्।ओं श्रीं रं रामानुजाय नमः

वर वर मुनि गायत्रि

ओं शेषांशकाय विद्महे वर रम्याय धीमहि। तन्नो सौम्यः प्रचोदयात्। ओं वं वरवर मुनये नमः

****

श्रीमते रामानुजाय नमः

जीर्णोद्धारकाले शक्त्याकर्षण विधिः

आचार्यः नित्याराधनानन्तरं सर्वालंकार संयुक्तःस पवित्रकरः कुम्भाभ्यां वेद वाद्यघोषैः सह गर्भगेहं प्रविश्य.भगवतः पुरतः धान्यपीठे स करकं कुम्भं बाजनानि च निक्षिप्य. साञ्जलि हस्तः अस्य देवदेवस्य.....सन्निधौ राजराष्ट्राभिवृद्ध्यर्थम् कर्मार्चायाः चलित योगपीठस्य पुनः सन्धानार्थं शक्त्याकर्षणं करिष्ये। इति संकल्प्य। सभ्यनुज्ञां कृत्वा। कूर्मासने उपविश्य. प्राणायामादि भूतशुद्धि पूर्वकम् मानसाराधनान्तं कृत्वा। पुण्याहवाचन विष्वक्सेन पूजां च कृत्वा। तज्जलेन सर्वत्र प्रोक्ष्य। भगवन्तं समस्त उपचारपूर्वकं सम्पूज्य। पायसान्नं निवेद्य। नीराज्य. पुष्पाञ्जलिपूर्वकं भगवन्तं प्रार्थ्य। ''पूजा(आज्ञा) बिंबमिदं विष्णोः स्थापितं पूर्वसूरिभिः। पूज्यमानाऽङ्गवैकल्य दूषणंचेह वर्तते।अस्य बिंबस्यचोद्धारं कर्तुमिच्छति सांप्रति। देवदेव दयासिन्धो देहिनां मुक्ति दायकम्। उद्धारणार्थं जीर्णाणां अनुज्ञां देहि मे प्रभो।इति भगवन्तं प्रार्थ्य।पुष्पाञ्जलिं समर्प्य। प्रणम्य। तिरस्करिण्या संछाद्य।कुम्भादीनां शोषणादीनि कृत्वा.सुरभिमुद्रया अमृती कृत्य.कुम्भमध्ये आधारादि नारदान्तं अभ्यर्च्य। स्वगुरुं मनसाध्यात्वा। करके आधारादि पद्मान्तमभ्यर्च्य।उपकुम्भादिषु इन्द्रादीनावाह्य संपूज्य। श्री भूदेव्याः सह एकपीठे विराजमान सन्निधौ भगवदावाहनात् पूर्वं करधृत आवाहन पात्रे ओं श्रीं श्रियै नमः, ओं ह्रीं भूम्यै नमः इति श्रीभूदेवीं भगवतः श्रीवत्से नियोज्य। शक्त्याकर्षणकाले भगवद्बिम्बं पंचभूतमयं ध्यात्वा। वक्ष्यमाणेन विधिना तत्व सम्हार न्यासं कुर्यात्। ओं ङं नमः पराय चतुरश्राय पीत वर्णाय घ्राणोपस्थेन्द्रिय युताय शब्द स्पर्श रूप रस गन्ध गुण युताय पृथ्वी तत्वात्मने नमः। इति पादादि जान्वन्तं सम्हरामि।ओं घं नमःपराय स्फटिकवर्णाय अर्ध चन्द्राकाराय रसना पाय्विन्द्रिय युताय शब्दस्पर्श रूप रस गुण युताय अप् तत्वात्मने नमः। इति जान्वादि गुह्यान्तं सम्हरामि। ओं गं नमः पराय रक्त वर्णाय त्रिकोणाय दृष्टिचरणेन्द्रिय युताय शब्द स्पर्श रूप गुण युताय अग्नि तत्वात्मने नमः। इति गुह्यादि नाभ्यन्तं सम्हरामि।ओं खं नमः पराय धूम्र वर्णाय वृत्ताय त्वक्करेन्द्रिय युताय शब्दस्पर्श गुण युताय वायुतत्वात्मने नमः। इति नाभ्यादि नासान्तं सम्हरामि।ओं कं नमः पराय जलदवर्णाय निराकाराय वाक् श्रोत्रेन्द्रिययुताय शब्द गुण युताय आकाश तत्वात्मने नमः। इति नासादि मूर्धान्तं सम्हरामि।ओं पं नमःपराय सिताऽसित वर्णाय मनस्तत्वात्मने नमः। हृदि।ओं फं नमः पराय पाटल वर्णाय अहङ्का रात्मने नमः हृदि।ओं बं नमः पराय स्फटिकाभासाय बुद्धि तत्वात्मने नमः हृदि।ओं भं नमः पराय सित वर्णाय प्रकृत्यात्मने नमः हृदि।ओं मं नमः पराय

स्फटिकाभासाय जीव तत्वात्मने नमः। हृदि।इति बिम्बस्य सम्हार न्यासं कुर्यात्।एवं भगवच्चरीरव्यापिणं मन्त्रशरीरं शक्तिं भगवन्तं अतिसूक्ष्मेण बिम्बस्य नाभिकन्दे ध्यात्वा। ओं नमो भगवते वासुदेवाय आगच्छा इति वारचतुष्टयम् उक्त्वा, आवाह्य। नाभिकन्दात् सुषुंणया ब्रह्मरंद्रमार्गेण करस्थ आवाहन पात्र पद्ममागतं ध्यात्वा। पुष्पाञ्जलिपूर्वकं परमात्मानं कुम्भमध्ये योगपीठे विचिन्त्य। परवासुदेवं सुखासीनं ध्यात्वा। करके सुदर्शनमावाह्य। कुम्भस्थं भगवन्तं अर्घ्या दिभिरभ्यर्च्य। क्षीरगुळान्नं निवेद्य। नीराज्य। मूलबिम्बं नवेन वाससा आच्छाद्य. बिम्बसन्धानं कुर्यात्।

इति शक्त्याकर्षण विधिः संग्रहः।

****

अनुबन्धम्-1= ईश्वरे

सर्वत्राङ्ग समाधाने पुनस्सृष्टौ तु वा द्विजाः।
जीर्णे बिंबगतां शक्तिं कुम्भेत्वावाह्य देशिकः।
कुर्वन्नभ्यर्चनं तत्र बिम्बसन्धानमाचरेत्।
मासादर्वाक् समाधाने कुम्भे शक्तिं समर्चयेत्।
तदूर्ध्वं द्वादशाब्दान्तं समादान विळंबने।
कृत्वा बालगृहम् तत्र बालबिम्बम् यथा विधि।
संस्थाप्य तत्र तच्छक्तिं समावाह्य समर्चयेत्।
यथापूर्वं प्रतिष्ठाप्य स्थापयेत् पुरुषोत्तमम्।

अनुबन्धम्-2

जीर्णोद्धरविधिः प्रोक्तः सर्वेषाम् मुनिपुङ्गवाः।
तत्तत्सान्निध्यानुगुणं प्रतिष्ठादिकमाचरेत्।
प्रायश्चित्तं समभ्यूह्य साधकस्तु समाचरेत्।
बिम्बादीनां च धामादेरङ्गभङ्गादिके सति।
आचार्यस्त्वनुतापार्तः स्वमन्त्रमयुतं जपेत्।
तदारभ्य ब्रह्मचर्य व्रतस्थैः साधकैस्सह।
यावद्बिम्बसमापत्ति जपेन्मन्त्रमतन्द्रितः।
चतुस्थानार्चनं कुर्यात् सर्वदोषप्रशान्तये।

त्रिरात्रं वा सप्त रात्रं पात्रेभ्यो दानमाचरेत्।
गो भू हेमादिकानां तु यथाशक्ति मुनीश्वराः।
ब्राह्मणान् भोजयेन्नित्यं शतंवापि सहस्त्रकम्।
यावत्बिम्बस्य सन्धानं विशेषेणाऽर्चयेद्विभुम्।
सन्धानान्ते तु देवस्य कृत्वा संप्रोक्षणादिकम्।
शान्तिहोमं तथा दानं ब्राह्मणानां च बोजनम्।
कारयेद्यजमानस्तु आचार्यं दक्षिणादिभिः।
तोषयेच्छ्क्त्यनुगुणं तेन तृप्यति केशवः।(ई-१९अ)

<u>प्रतिष्ठादिषु कालेषु द्रव्यादीनां दानफलानि</u>

यज्ञ वृक्षोद्भवैः शान्तिः सौभाग्यं कुसुमैर्भवेत्।
धूपद्रव्यैः सदा आरोग्यं पुष्टिर्दध्ना पयः शुचिः।
अन्नेन विविधान् कामान् आज्येनआयुष्मतीः प्रजाः
श्वेतपद्मैस्तु जुहुयादिच्छन् ब्रह्मश्रियं नरः।
लक्ष्मीपुष्पैस्तु जुहुयात् लक्ष्मीकामोऽथवारुणैः।
पद्मबिल्वसमिद्भिः वा ज्ञानकामस्तु सर्पिषा।
कन्यकामो हुनेत् लाजैःगोकामो गोमयैः पुनः।
आयुष्कामस्तु दूर्वाभिः भूमिकामस्तु मृत्स्नया।
यवैःच इन्द्रियकामस्तु तिलैः सर्वजनप्रियः।
बृह्मवर्चसकामस्तु ब्रह्मवृक्षसमुद्भवैः।
वेणुभिश्च यवैश्चैव नीवारैः शालिभिः तथा।
सर्वे कामाः प्रसिध्यन्ति होतुर्बीजै यथोदितैः।
लाजहोमेन सिध्यन्ति सर्वे कामा न संशयः।
अन्नेन अन्नाद्यकामस्तु पुत्रकामस्तु पायसैः।
निंबपुष्पैः हिरण्यार्थी सर्वेसिध्यन्ति सर्पिषा।

<u>प्रतिष्ठादि कर्तव्य यजमानानां भक्तानां फलानि</u>-

य इत्थं स्थापनं कुर्यात् देवदेवस्य शार्ङ्गिणः।

तस्य देवी प्रवक्ष्यामि भुक्तिमुक्ति फलप्रदम्।
यजमानो ब्राह्मणश्चेत् सर्व विद्याधिपो भवेत्।
क्षत्रियश्चेत् सार्वभौमःभवेद् वैश्यस्तु पद्मजे।
पश्धाराम गृहक्षेत्र धन धान्य समृद्धिमान्।
शूद्रश्चेत् यजमानस्तु मोदन्ते द्रविणादिभिः।
पुत्रार्थी पुत्रमाप्नोति वित्तार्थी वित्तमाप्नुयात्।
यद्यत्कामयते कर्ता तत्सर्वं लभते जवात्।
आदेवालय भूभागात् ध्वजान्तादपि मण्डपात्।
सर्वोपकरणोपेतात् सर्वेष्वावरणेषु च।
समन्तात् परमाणूनां सर्वेषां यावती रमे।
संख्या संजायते तासु एकैकस्य वरानने।
प्रेरका यजमानश्च कोटि कोटि शतं समाः।
उषित्वा विष्णुलोके तु यात्यन्ते परमं पदम्।
अपुत्राः पुत्रिनः संतु पुत्रिनस्संतु पौत्रिनः।
अधनाः स धनाः सन्तु जीवन्तु शरदां शतम्।

<u>इति श्री भगवत्प्रतिष्ठा विधिः संग्रहः</u>

प्रतिष्ठा कार्येषु उपयुक्त वेदमन्त्राः

ओं चरणम् पवित्रम्
विष्णोरराट -गन्धद्वारां-
आप उन्दन्तु -
देवस्यत्वा सवितुः
ग्रीष्मो हेमन्त-
शन्नोदेवी-
धन्वनागा-
भद्रंकर्णेभिः
मूर्द्धानं-
आपोहिष्ठा -
इमंमे वरुणः-
इन्द्रं नत्वा -
मृत्तिका सूक्तम् -
शाकुनसूक्तम्(शुक्लयजुः)
द्वारपालीयम् (सामं)
पतिंविश्वस्य (ऋग्वेदम्)
द्वासुपर्णा(सामं)
योविश्वतश्चक्षुः
अतोदेवा
त्रातारमिन्द्रं
अयश्चाग्नेः
यदुलूको -
असुन्वन्तम्
आनोनुयुद्भिः
सन्तोपयांसि
तमीशानम्
उत्तिष्ठ ब्रह्मणस्पते
प्रतिष्ठासीति (सामं)
पञ्चसूक्त

अनुबन्धम्-3

श्री गरुड मङ्गळाष्टकम्

(१)श्रीमत्सुधावार्ति सुराधिनाथः पादारविन्दार्चन तत्पदश्रीः।
स वैनतेयो विहगाधिपोऽसौ खगेश्वरोन श्शुभमातनोतु।
(२) सुदीर्घ नासापुटचारु वक्त्रःप्रसन्न नेत्रांबुज कांतिरम्यः।
अनंत साधारण विक्रमाद्यः खगेश्वरो नश्शुभमातनोतु।
(३)सुवर्ण वर्णो भुजगोपवीति नागान्तको विष्णु रथस्सुवर्णः।
प्रह्लादवद्भागवताऽग्रगण्यःखगेश्वरोनश्शुभमातनोतु।
(४)ब्रह्मेन्द्रमुख्याऽमरसिद्ध साध्यःगन्धर्व विद्याधरमाननीयः।
सुधासमुद्धारण कार्य कर्ता खगेश्वरोनश्शुभमातनोतु।
(५)विज्ञान सम्पन्नमतिप्रसन्नः लक्ष्मीकटाक्षांचित पुण्यमूर्तिः।
हरिप्रियो वैष्णव धर्मवेति खगेश्वरोनश्शुभमातनोतु।
(६)ताक्ष्यो गुणाड्योऽतिबलः कृपाळुःसत्यव्रतः कामचरो मनोज्ञः।
श्रुति स्मृतिज्ञान गुरुः प्रदाता खगेश्वरोनश्शुभमातनोतु।
(७)धर्मःप्रसङ्ग प्रथितात्म शौर्यः जगद्धितानन्द गुणांबुराशिः।
स पक्ष विक्षेपित दिक्तटान्तःखगेश्वरोनश्शुभमातनोतु।
(८)दर्वीकरेन्द्राभरणांचिताङ्गः मनोज्ञ सौवर्ण किरीट धारी।
महानुभावो भगवत्प्रसन्नः खगेश्वरोनश्शुभमातनोतु।
ऐरावतः पुण्डरीकः वामनः कुमुदोंजनः।
पुष्प(शुभ्र)दन्तःसार्वभौमःसुप्रतीकश्च दिग्गजाः।(इत्यमरः)

श्री गजाष्टकमं

(१)श्रीमत्सुधावारिधि जायमान हरिप्रियाराधन सक्त चित्तः।
देवैर्नुतो अब्रमुया च युक्तःऐरावतो मङ्गलमातनोतु।
(२) उत्पुल्लपद्मैः कृतहार भूषितः प्रमत्तमातङ्ग गणैश्च सेवितः।
स्वकीय भार्याकपिला समेतः सपुण्डरीकःशुभमातनोतु।

(३) विष्णोःकृपावीक्षण लक्ष वक्षस्थलाश्रय कल्पित दाम भूषणः।
अनुक्षणं पिङ्गळया समेतः स वामनो मङ्गलमातनोतु।
(४)प्रहर्षितो देवगणैश्च संस्तुतः मृदावली कल्पित शौर्य गात्रः।
प्रतापशीलो कुमुदोगजेन्द्रः पृथ्वीयुतो मङ्गलमातनोतु।
(५)स्ववर्ण वित्रस्थ निवान्धकारो सुवर्णताम्राक्ष कला सु नेत्रः।
स्व ताम्रपर्णी प्रियया समेतःगजाननो मङ्गलमातनोतु।
(६)सरोज संधारित दिव्यसुंदरः श्रिया समालिङ्गत शुद्ध चित्तः।
स्वशुभ्रदन्तीश्वर शुभ्रदन्ती गजेश्वरो मङ्गलमातनोतु।
(७) स सर्वभूम्या विधितः प्रकारः लक्ष्मी सु सम्पूजन बद्धदीक्षः।
सुशोभनाख्या करिणी समेतः सु सार्वभौमः शुभमातनोतु।
(८)विष्णवाज्ञाकल्पित सुप्रतीको ईशानदिग्रक्षण बद्ध दीक्षः।
स्वचांजना पत्नियुतो गणाड्यःसमाधिपो मङ्गलमातनोतु।
करिण्यो अभ्रमुः कपिला पिङ्गला अनुपमा क्रमात्।
ताम्रपर्णी शुभ्रदन्ती चांजना चाञ्जनावधि। (इत्यमरः)

हनुमद्भुजङ्ग स्तोत्रं

ओं प्रपन्नानु रागं प्रभा काञ्जनाङ्गं जगद्भीति शौर्यं तुषाराद्रि धैर्यं।
तृणी भूत हेतिं रणोद्यद्विभूतिं भजे वायु पुत्रं पवित्राप्त मित्रं। १
भजे राम रम्भावनी नित्यवासं भजे बाल भानु प्रभाचारु भासं।
भजे चन्द्रिका कुन्द मन्दार हासं भजे सन्ततं राम भूपालदासं। २
भजे लक्ष्मण प्राण रक्षादि दक्षं भजे तोषिदानेक गीर्वाण पक्षं।
भजे घोर सङ्ग्राम सीमाह दाक्षं भजे रामनामादि सम्प्राप्त रक्षं।३
करालाट्ट हासं क्षितिक्षिप्त पादं.।घन घ्रान्तभृङ्गं कटिस्तोरु जङ्घं।
वियद्व्याप्त केशं भुजाश्लेषिताश्मं जय श्री समेतं भजे रामदूतम्।४
छलद्वाल घात भ्रमच्चक्र वाळं। कटोराट्ट हास प्रभिन्नाब्जजाण्डं .।

महा सिम्हनादाद्विशीर्ण त्रिलोकं भजेचाञ्जनेयं प्रभुं वज्र कायम्।५
रणे भीषणे मेघ नाथे स नाथे सरोषं समारोप्य शिलावृष्टि मुग्रां।
खगाणां गणानां सुरानाञ्च मार्गे नटन्तं महान्तं हनूमन्तमीडे।६
घनद्रत्न जम्बारि दम्बोळिधारा ।घनद्रत्न निर्दूत कालोग्र दन्तं ।
पदाघात भीताब्दि भूतादि वासं रणक्षोणिताक्षं भजे पिङ्गळाक्षं।७
महाग्राह पीडां महोत्पाद पीडां।महारोगपीडां महा तीव्रपीडां.।
हरन्त्याशु ते पाद पद्मानु रक्ता नमस्ते कपिश्रेष्ठ राम प्रियाय।८
सुदासिन्धु मुल्लङ्घ्य नाग प्रदीप्ताः।सुदाचौषधीस्ता प्रगुप्त प्रभावाः।
क्षणे द्रोणशैलस्य पृष्टे प्ररूढाः त्वया वायु सूनो ऽखिलानीय दग्धाः।९ (तद्वाः)
समुद्रं तरङ्गादि रौद्रं विनिद्रं ।विलङ्घ्योरु जङ्घा स्तुतोमत्र्य सङ्घैः।
निरातङ्कमाविश्य लङ्कां विशङ्को भवानेव सीतादि शोकापहारी।१०
महायोगिना ब्रह्म रुद्रा दयो वा ।न जानन्ति तत्वं निजं राघवस्य।
कथं ज्ञायते मादृशैर्नित्यमेव। प्रसीद प्रभो मारुते नमस्ते।११
नमस्ते महासत्व बाहाय तुभ्यं।नमस्ते महावज्र देहाय तुभ्यं।
नमस्ते परा भूत सूर्याय तुभ्यं।नमस्ते कृतामर्त्य कार्याय तुभ्यं।१२
नमस्ते सदा ब्रह्मचर्याय तुभ्यं नमस्ते सदा वायुपुत्राय तुभ्यं.।
नमस्ते सदा पिङ्गळाक्षाय तुभ्यं नमस्ते सदा राम भक्ताय तुभ्यं ।।१३
हनूमद्भुजङ्गं प्रयातं प्रभाते प्रदोषोपि वाचाऽर्धरात्रेपि मर्त्य।
पठन्भक्ति युक्तःप्रमुक्तागजालःनमस्सर्वदा रामभक्तिं प्रयाति।।
असाध्य साधक स्वामिन्नऽसाध्यं तव किं वद।
राम दूत कृपासिन्धो मत्कार्यं साधय प्रभो।.

अनुबन्धम्-4

श्रीमतेरामानुजाय नमः

स्तोत्रमन्त्रपुष्पम्. (वेद विण्णप्प प्रारम्भः)

*लक्ष्मीनाथाख्यसिन्धौ शठरिपुजलधिप्राप्यकारुण्यनीरम्
नाथाद्रावभ्यषिञ्चत्तदनुजलज धृग्राघवाभ्यांघुराभ्याम्।
गत्वातांयामुनाख्यां सरितमध यतीन्द्राख्यपद्माकरेन्द्रम्
संपूर्यप्राणिसस्यं प्रवहित नितरां देशिकेन्द्रभ्रमोघैः।
*आदौ वेदानृगादींस्तदनु गुणनिधेः कल्पगुह्येतिहासान्।
श्रेष्ठं रत्नं पुराणं तदनु च सुमहाभारतं श्रीशुकोक्तिम्।
ईयल् स्तोत्राधिराजं यतिवरकदितं भाष्ययुग्मं च गद्यम्।
स्तोत्रं स्तोत्रम्मन्नोज्ञं श्रुणु वरदविभो रङ्गभर्तुर्दयायाः।
*तूर्णं सर्वज्ञ शेषिन् शतकमपि तदा सप्ततिं विंशतिं च।
रूढां श्रेष्ठा ससारा सदय यतिपतिर्मङ्गळं पाठमेतत्।
स्वामिन् शौरेः पवित्रं यदुतनयकृतं कीर्तनं नारसिह्मम्।
नृत्तं गीतं च वाद्यं शठरिपु कथितं ग्रंथमाशु श्रुणुष्व।
*परंपरक्रमादेता नृगादीन्वैष्णवप्रिय।
श्रुणुष्व सर्वलोकेश नृकण्ठीरिव सर्वदा।
*स्वामिन् श्रीशैलधामन् गुणकृत महिमन् कोटि चन्द्रार्कधामन्.
स्वामिन् रम्याङ्गकान्ते निखिलतनुभृतां क्षेमदानैकदीक्ष।
धर्माधर्मप्रतिष्ठाक्षय फलद जने देव ऋग्वेदमादौ।
सर्वज्ञानन्दपूर्णा श्रुतियुगविषया कुर्विदानीमुदार।
***ऋग्वेदमवधारय।ऋग्वेदत्तुक्करुळप्पाडु।**
हरिः ओम् अग्निमीळे पुरोहितं यज्ञस्यदेवं ऋत्विजम्।
होतारं रत्नदातमम्।हरिः ओं-
*कल्याणानां निधानाऽखिलजन नयनानन्द दामन्

प्रहारद्विल्कुञ्चद्विद्धराळद्विषकुपित मृगेन्द्रादनूदुज्जीवनाङ्ग।
प्रह्लादाऽनुग्रहाय प्रकटित सरपञ्चाननाकारशालिन्।
आम्नायं रम्यमूर्ते **यजुर**भिदमिदं श्रोत्रपात्रं गृहाण।
यजुर्वेदमवधारय।यजुर्वेदत्तुक्करुळप्पाडु।
हरिः ओंयवस्तोपायवस्तः देवोवःइषेत्वोर्जेत्वा वा -
सविताः प्रार्पयतुः श्रेष्ठतमाय कर्मणे। हरिः ओम्
संपूर्णावाप्तकाम प्रबलतरविरोधिप्रहाणप्रचण्ड।
प्रोत्फुल्लांबोजनेत्र स्फुरदुरुकरुणापूर्ण देहाभिराम।
पुम्बञ्चास्यात्मबन्धो शठरिपु यतिराट् पादबंधस्स्पृहाणां
सामांनायं त्वदर्चा विधिनियमपद श्रोतृलक्ष्मीं कुरुष्व।
सामवेदमवधारय।सामवेदत्तुक्करुळप्पाडु।
हरिःओम्। अग्न आयाहि वीतये घृणानो हव्यदा़तये।
निहोतासत्सि बर्हिषि। हरिः ओं
*श्रीरामारञ्जिताङ्ग स्फुरदमल परीसार भूषोज्ज्वलाङ्ग।
श्रीविष्णो देवदेव प्रतिभटतनुज द्वान्तसन्दोह भानोः।
सर्वब्रह्माण्डनाथा ऽखिलविभुदगुरो भक्त बन्धो नृसिह्म।
स्वामि**न्नाथर्वणीं** तां गिरिमुदित समाह्लादमाकर्णये माम्।
अथर्व वेदमवधारय।अथर्व वेदत्तुक्करुळप्पाडु।
हरिःओम्। शन्नोदेवीरभिष्टय आपोभवन्तु पीतये।
शंयोरभिस्त्र वन्तु नः।हरिः ओम्।
सद्ब्रह्मात्मपदैस्त्रयी शिरसियो नारायणोक्त्या तथा।
व्याख्यातोगति साम्यलब्ध विषयानन्यत्वबोधोज्ज्वलैः।
निस्तुल्याधिकमद्वितीयममतं तं पुण्डरीकेक्षणम्।
प्रारूढश्रियमाश्रये वनगिरेःकुञ्जोद्गतं सुन्दरम्।।
अथर्व शिरोपनिषदमवधारय। अथर्व शिरोपनिषत्तुक्करुळप्पाडु।

*ओमित्यग्रे व्याहरेत्। नम इति पश्चात्। नारायणायेत्युपरिष्टात्।
ओ मित्येकाक्षरम्। नम इति द्वे अक्षरे। नारायणायेति पञ्चाक्षराणि। एतद्वै नारायणस्याष्टाक्षरं पदम्। योहवै नारायणस्याष्टाक्षरं पदमध्यम इति। अनुपब्रुमःसर्वमायुर इति। विंदतेप्राजापत्यं रायस्पोषंगौपथ्यम्।ततोमृतमश्नुते.। इत्युपनिषत्ततोऽमृतत्वमश्नुत इति। य एवं वेद-
*अत्रामुत्रापिजैत्रं जयदखिलकळा जैत्रयात्रा प्रवीणम्.
दात्रं दुष्कामनस्य त्रुटन परिविधेदात्रिसंत्रानदक्षम्।
गात्रं गोत्रार्यमित्र त्रुटनपरिलसद्विक्रमस्योग्र वृत्तैः।
वेत्रं बिभ्रत्सपायात् करकमलतले सूत्रवत्यात्सहायः।
*न्यायवृत्ति प्रभृतिभिर्भवता विसृष्टैः।
वेदोपब्रह्मण विदौ ऊचितैरुपायैः।
श्रुत्यर्थमद्रुधमिव भानुकरैर्विभेजुः।
त्वद्भक्तिभावित विकल्मष शेमुषीकाः।
गृह्यसूत्रमवधारय।गृह्यसूत्रत्तुक्करुळप्पाडु।
अथकर्माण्याचाराद्यानि गृह्यन्ते।
उदगयन पूर्व पक्षाहः।
पुण्याहेषु कार्याणि, यज्ञोपवीतिना प्रदक्षिणम्।
*पारावारपयो विशोषणकलापारीणकालानल
ज्वालाजाल विहारहारि विशिखव्यापार घोरक्रमः।
सर्वावत्सु सकृत्प्रपन्नजनता संरक्षणैकं प्रति।
धर्मोविग्रहवानदर्श निरतिं धन्वीन तन्वीतु नः।
श्रीरामायणमवधारय।श्रीरामायणत्तुक्करुळप्पाडु।
तपस्वाध्याय निरतम् तपस्वि वाग्विदां वरम्।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम्।
*अनन्त कल्यानगुणं प्रपन्नंपराशरं तं प्रणतोस्मि नित्यम्।.
पुराणरत्नं विमितं मनोज्ञं चकारियोगी सदयह परम यः।

पुराण श्रेष्टमान विष्णुपुराणमवधारय।विष्णुपुराणत्तुक्करुळप्पाडु।

"अंशौष्षड्भिभस्समाकीर्णमङ्गैर्वेदमिवापरम्।
पुराणं वैष्णवंचक्रे यस्तं वन्दे पराशरम्।
पराशरं मुनिवरं कृतपौर्वाङ्गिक क्रियम्।
मैत्रेयं परिप्रश्च प्रणिपद्याऽभिवाद्यच।
*कृष्णद्वैपायनं व्यासं विद्धि नारायणं परम्।
कोह्यन्योभुविमैत्रेयमहाभारतकृद्भवेत्।

महाभारतमवधारय।महाभारतत्तुक्करुळप्पाडु।

*नारायणं नमस्कृत्यनरं चैवनरोत्तमम्।
देवीं सरस्वतींव्यासं ततो जय मुदीरयेत्।
*मीनाकृतेकमटकोल नृसिह्मवर्णि स्वामिन्परश्चथ तपोधनरामचंद्र।
शेषांशराम यदुनन्दनकल्किरूपश्रीव्यासराज रचितं श्रुणुत्वच्चरित्रम्।

श्रीमद्भागवतपुराणत्तुक्कु अरुळप्पाडु।

जन्माद्यस्य यतोन्मयामितरतेचार्द्रेश्वभिज्ञस्वराट्.
तेन ब्रह्महृदाय आदिकवये मुह्यन्तियत्सूरयः।
तेजूवारिमृदां यथाविनिमयो यत्र त्रिवर्गोमृषा।
धाम्नास्वेनसदा निरस्तकुहकं सत्यम्परं धीमहि।
*श्रीरङ्गनायक कृपाकटाक्षलब्ध श्रीवैष्णवपरिपूर्ण !
स्वमतस्थापक स्त्र निरंतरावलोकनभगवत्प्रतिपादक तत्वशा ! परमतनिरचीन ! ! दिग्विजयीभव ! विजयीभव ! जय ! श्रीयामुनाचार्यस्वामिन्!

स्तोत्रराजमान स्तोत्ररत्नत्तुक्करुळप्पाडु।

*श्रीरङ्गमङ्गळमहोत्सव वर्धनाय।
वेदान्तसार परमार्थ विवर्धनाय।
कैङ्कर्यलक्ष्मण विलक्षणमोक्षणाय।
रामानुजोविजयते यतिराजराजः।

श्री भाष्यत्तुक्करुळप्पाडु।

श्री भाष्यं

ओं अखिल भुवन जन्म स्थेम भंगादि लीले।
विनत विविध भूत व्रात रक्षेक दीक्षे।
श्रुति शिरसि विदिप्ते ब्रह्मणि श्रीनिवासे।
भवतु ममपरस्मिन् शेमुषी भक्ति रूपा।
पाराशर्य वचस्सुधामुपनिष्द्गुग्दाब्धि मध्योद्धृताम्।

संसाराग्नि विदीपनव्यपगत प्राणात्मसञ्जीविनीम्।
पूर्वाचार्य सुरक्षितां बहुमति व्यागाध दूरस्थिताम्।
आनीतां तु निजाक्षरैस्सुमनसो भौमाःपिबन्त्वन्वहम्।.
ओम् भगवद्बोधायनकृतां विस्तीर्णां ब्रह्मसूत्रवृत्तिं पूर्वाचार्याः सञ्चिक्षिपुः।

तन्मतानुसारेण सूत्राक्षराणि व्याख्यास्यंते।
अथातोब्रह्मजिज्ञासा। अथातो ब्रह्मजिज्ञासा। अत्रायं अथःशब्दः आनंतर्ये भवति।
अथःशब्दोवृत्तस्य हेतुभावे।अधीतसा' सशिरस्कवेदस्याऽधिगताल्पास्थिर फलकेवल कर्मज्ञानतया संजात मोक्षाभिलाषस्यऽनंतास्थिरफल ब्रह्मजिज्ञासा हि अनंतरभाविनी। ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा। ब्रह्मण इति कर्मणि षष्ठि। कर्तृकर्मणोः कृततीति विशेषविधानात्। यद्यपि संबंधसामान्य परिग्रहोपि जिज्ञासायाः कर्मापेक्षत्वेन कर्मार्थत्व सिद्धिः। तथाप्याक्षेपतः प्राप्तातानिकस्यैव ग्राह्यत्वात् कर्मणि षष्ठी गृह्यते। न च प्रतिपदविधानाच षष्ठी न समस्यत इति। कर्मणि षष्ठ्यास्समास निषेधः श'नीयः। कृद्योगाच षष्ठी समस्यत इति प्रति प्रसव संभवात्। ब्रह्मशब्देन च स्वभावतो निरस्तनिखिलदोषः अनवधिकातिशयोऽसंख्येय कल्याणगुणगणः पुरुषोत्तमोऽभिदीयते।सर्वत्र बृहत्व गुणयोगेन हि ब्रह्मशब्दः।बृहत्वं च स्वरूपेण। गुणैश्च यत्राऽनवधिकातिशयं सोस्य मुख्यार्थः।स च सर्वेश्वर एव। अतो ब्रह्म शब्दस्तत्रैव मुख्य वृत्तः। तस्मादन्यत्र तद्गुणलेशयोगादौपचारिकः। अनेकार्थ कल्पनायोगात् भगवच्छब्दवत्।

तापत्रयाऽऽतुरैः अमृतत्वाय स एव जिज्ञास्यः। अत सर्वेश्वर एव जिज्ञासा कर्म भूतं ब्रह्म ज्ञातुमिच्छा जिज्ञासा। इच्छायां इष्यमाणं प्रधानत्वात्। इष्यमाणं ज्ञानमिह विधीयते। मीमांसापूर्वभाग ज्ञातस्यकर्मणोऽल्पास्थिर फलत्वात् परिधनभागावसेयस्य ब्रह्मज्ञानस्य अनंताक्षयफलत्वाच्च पूर्ववृत्तात् कर्मज्ञानादनन्तरं।तत एव हेतोः ब्रह्म ज्ञातव्यं इत्युक्तं भवति।।

*श्रीरङ्गराजकरुणा परिपूर्णनामा,नामामृतेनपरिपूरित सप्तलोकी
लोकातिवायि यतिराजपदाब्ज भोगि,भोगीश्वरो वरमुनिर्मम रक्षकोस्तु।

श्रीयतिराजविंशतिक्करुळप्पाडु.

*पाठादेव प्रशमित तयोग्रन्थयोयस्यगाधाः।
सर्वान् भोगान् परमपिपदं प्राणिनः प्रापयन्ति।
आबिभ्राणोवकुळकुसुमैः नद्धमंशेनमाल्यम्।
द्रष्टव्योमे सखलभगवान् द्राविडब्रह्मदर्शी।

इयल् प्रभन्दत्तुक्करुळप्पाडु।

अनुबन्धम्-5

वेद शात्तुमरै-समापनक्रमः।

संहिता

हरिः ओम्-

समुद्र उदरमंतरिक्षं पायुद्यावा पृथिवी आण्डौ ग्रावा रेपस्सोमोरेतो

यज्जभ्यते तद्विद्योदते यद्वितुनुते तत्स्थनयति यन्मेहति तद्वर्षति

वागेवास्य वागहर्वा अश्वस्य जायमानस्य महिमा पुरस्ताज्जायते रात्रिरेणं महिमा पश्चादनुजायत एतौवै महिमा वश्वमभित

स्संबभूवतुर्हयो देवानवह दर्वासुरान् वाजीगंधर्वानश्वो मनुष्यान् समुद्रोवा अश्वस्य योनिस्समुद्रो बन्धुः।।

***- ब्राह्मणम्* -**

यद्दर्शपूर्णमासौ यजते। अश्वस्यैव मेध्यस्य पदेपदेजुहोति। एतदनुकृधि हस्मवै पुरा। अश्वस्यमेध्यस्य पदेपदेजुह्वति। योवा अश्वस्यमेध्यस्य विवर्तनंवेद। अश्वस्यैव मेध्यस्यविवर्तने विवर्तने जुहोति। असौवाऽऽदित्योश्वः। स आहवनीयमागच्छति। तद्विवर्तते। यदग्निहोत्रं जुहोति। अश्वस्यैवमेध्यस्य विवर्तने विवर्तने जुहोति। एतदनुकृतिहस्मवै पुरा। अश्वस्य मेद्यस्य विवर्तने विवर्तने जुह्वति।

***-आरण्यकम्*-**

यदेकादशेहं प्रवृज्यते। इन्द्रोभूत्वा तृष्टुभमेति।यद्वादशेहं प्रवृज्यते। सोमोभूत्वा सुत्यामेति। यत्पुरस्तादुपसतां प्रवृज्यते। तस्मादितः पराङमूल्लोकागुस्तपन्नेति। यदुपरिष्टदुपसदां प्रवृज्यते। तस्मादमुतोर्वाङिमान् लोकागुस्तपन्नेति। यएवं वेद। ऐवतपति।

***-काटकम्*-**

तस्यैवात्मा पदवित्तं विदित्वा। न कर्मणालिप्यते पापकेन। पञ्चपञ्चाशतस्त्रिवृदतवत्सराः। पञ्चपन्ज्चाशतःपञ्चदशाः।पञ्चपञ्चादशः सप्तदशाः। पञ्चपञ्चादश एकविगुंशाः। विश्वसृजागुं सहस्त्र संवत्सरम्।एतेनवै विश्वसृज इदं विश्वमसृजन्त। यद्विश्वमसृजन्त।
तस्माद्विश्वसृजः। विश्वमेनाननुप्रजायते। ब्रह्मणस्सायुज्यगुं सलोकतांयन्ति। एतासामेव देवतानागुं सायुज्यम्। साष्टितागुं समान लोकतांयन्ति। य एतदुपयन्ति। एचैनः प्राहुः। एभ्यश्चैनः प्राहुः। ओम्।

***-उपनिषत्*-**

तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धापत्नी

शरीरमिध्ममुरोवेदिर्लोमानि बर्हिर्वेद श्शिखा हृदयं यूपः काम आज्यं मन्युःपशुस्तपोऽग्निर्धर्मश्शमयिता दक्षिणावाग्घोताप्राणउद्गाता चक्षुरध्वर्युर्मनोब्रह्मा श्रोत्रमग्नीद्यावद्भ्रियते सादीक्षा यदश्नाति तद्धविर्यत्पिबति तदस्यसोमपानं यद्रमते तदुपसदो यथ्सञ्चरत्युपविशत्युत्तिष्ठते च सप्रवग्र्यो यन्मुखं तदाहवनीयोया व्याहृतिराहुतिर्यदस्य विज्ञानं तज्जुहोति यथ्सायं यत्प्रातरत्ति तत्समिधं यत्सायं प्रातर्माध्यंदिनं च तानि सवनानि ये अहोरात्रे ते दर्शपूर्णमासौ येर्धमासाश्च मासाश्च ते चातुर्मास्यानि य ऋतवस्ते पशुबन्धा ये संवत्सराश्च परिवत्सराश्च तेहर्गणास्सर्वद संवा एतत्सत्रंयन्मरणंतदवभृत एतद्वै जरामर्यमग्निहोत्रँ सत्रं य एवं विद्वानुदगयने प्रमीयते देवानामेव महिमान'त्वाऽऽदित्यस्य सायुज्यं गच्छत्यथ यो दक्षिणाप्रमीयते पितृणामेव महिमानं गत्वा चन्द्रम सायुज्यंगच्छत्येतौवै सूर्यो चन्द्रमसोर्महिमानौब्रह्मणो विद्वानभिजयतितस्माद्ब्रह्मणोमहिमानमाप्नोति तस्माद्ब्रह्मणो महिमान मित्युपनिषत्। हरिः ओम्।।

***-सामवेदम्*-**

उन्नयामि होइ।(इति त्रिः) आदित्यप्राञ्चय्यन्त उन्नयामि होइ (इति त्रिः) अहोरात्राण्यरत्राणि होइ(इति त्रिः) द्यैर्णौ हा उ(इति त्रिः) तस्यामसामादित्य ईयते हाउ(इति त्रिः)
तस्मिन्वयमीयमान ईयामहे हाउ(इति त्रिः) ईयामहे हा उ (इति द्वि) ईयामहे हा उ वा।
प्रियेधामन्स्त्रियक्षरे (इति द्वि)।प्रिये धामगुं स्त्रियक्षरे। हा उ हा। हरिः ओम्।

अथर्ववेदम्-

हरिः ओम् प्रत्यगानन्दं ब्रह्मपुरुषं प्रणव स्वरूपम्। अकार उकार मकार इति। तानेकदासमभरत्तदेदतो मिति। यमुत्क्वामुच्यते योगिन् जन्मसंसारबन्धनात्। ओं नमोनारायणायेति मन्त्रोपासकः। वैकुण्ठभुवनलोकं गमिष्यति।तदिदं परं पुण्डरीकं विग्नानघनम्। तस्मात्तदिदावन् मात्रम्। ब्रह्मण्योदेवकीपुत्रो ब्रह्मण्यो मधुसूदनो। कारणरूपमकारपरब्रह्मोम्। एतदथर्व शिरोयोऽधीते। प्रातरधीयानो रात्रिकृतं पापं नाशयति। सायमधीयानो दिवसकृतं पापं नाशयति। सायंप्रातरधीयानो पापोऽपापोभवति। माध्यंदिनमादित्याभिमुखोयोधीयानः। पञ्चपातक उपपादकात्प्रमुच्यते। सर्ववेदपारायणपुण्यं लभते। नारायणसायुज्यमवाप्नोति। नारायणसायुज्यमवाप्नोति। य एवं वेद। इत्युपनिषत्। हरिः ओम्।

श्री रामायणम्-

ततस्स प्रयतोवृद्धो वसिष्टो ब्राह्मणैस्सह।
रामं रत्नमये पीठे सहसीतां न्यवेशयत्।
वसिष्टो वामदेवश्च जाबालीरथकाश्यपः।
कात्यायनो सुयज्ञश्च गौतमो विजयस्तथा।
अभ्यषिञ्चन्नर व्याघ्रं प्रसन्नेन सुगन्धिना।
सलिलेन सहस्त्राक्षं वसवोवासवं यथा।
कुटुंभवृद्धिं धनधान्य वृद्धिं श्रियञ्चमुख्याः सुखमुत्तमं च।
श्रुत्वाशुभं काव्यमिदं महार्थं प्राप्नोतिसर्वान् भुविचार्थसिद्धिम्।

श्री विष्णुपुराणम्।

इति विविधमजस्य यस्यरूपं प्रकृतिपरात्ममयं सनातनस्य।
सदिशतुभगवानशेषपुंसान् हरिरप जन्मजराधिकान् समृद्धिम्।

श्री भगवद्गीता -

यत्रयोगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।

तत्रश्रीर्विजयोभूतिः दृवानीतिर्मतिर्मम।

स्तोत्र रत्नम्-

अकृत्रिमत्वच्चरणार विंन्दप्रेमप्रहर्षावदिमात्मवन्तम्।

पितामहं नाथमुनिं विलोक्यप्रसीदमद्धत्तम चिंन्तायित्वा।

श्री भाष्यम्-

यदि परमपुरुसायत्तं मुक्तैश्वर्यम्। तर्हि तस्य स्वतन्त्रत्वेन तत्स'ल्पान्मुक्तस्य पुनरावृत्तिसंभवान शंकेत्यत्राह।अनावृत्तिश्शब्दात्, अनावृत्तिश्शब्दात्। यथा निखिलहेय प्रत्यनीक कल्याणैकतानःजगज्जन्मादि कारणम्। समस्तवस्तु विलक्षणसर्वज्ञः !, सत्यसंकल्पः, आश्रित वात्सल्यैक जलधिः। परमकारुणिकः निरस्तसमाभ्यधिक संभावनः, परब्रह्माभिदानः, परमपुरुषोऽस्तीति शब्दादवगम्यते। एवमहरहरनुष्ठीयमान वर्णाश्रम धर्मानुगृहीत तदुपासनारूपः तत्समाराधनप्रतिः उपासीनाननाधिकाल प्रवृत्तानन्तदुस्तर कर्मसंजयरूपाविद्यां विनिवत्र्यस्वयाथात्म्यानुभव रूपानवधिकातिशयानन्दं प्रापय्य पुनर्नावर्तीति शब्दादवगंयते। शब्दश्च सखल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमपि संपद्यते। न च पुनरावर्तते, न च पुनरावर्तते इत्याधिकः।

तथा च भगवता स्वयमेव उक्तम्-

''मामुपेत्य पुनर्जन्मा दुःखालय मशाश्वतम्।

नाप्नुवन्ति महात्मानं संसिद्धि परमांगतः।

आब्रह्म भुवनान् लोकान् पुनरावृत्ति नोऽर्जुन।

मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते।''

इति न च उच्छिन्न कर्मबंधस्यासंकुचित ज्ञानस्य परब्रह्मैकानुभवैकस्वभावस्य तदेकप्रियस्य अनवधिकातिशयानन्दं ब्रह्मानुभवतोऽन्यापेक्ष तदर्थारंभात्यसंभवात् पुनरावृत्ति शंका। न च परमपुरुषःसत्यसङ्कल्पोऽत्यर्थप्रियं ज्ञानिनं लब्ध्वा कदाचिदावर्तयिष्यते।

य एवमाह-

प्रियो हि ज्ञानिनोत्यर्थं अहं स च ममप्रियः।

उदारास्सर्व एवै ते ज्ञानीत्वात्मैव मे मतम्।

आस्थितत्सहि युक्तात्मा मामेवानुत्तमां गतिम्।
बहूनां जन्मनामंते ज्ञानवान् मां प्रपद्यते।
वासुदेवस्सर्वमिति स महात्मा सुदुर्लभः। इति । सूत्राभ्यासशास्त्रपरिसमाप्तिं द्योतयति। इति सर्वं समञ्जसम्। इति श्री भगवद्रामानुज विरचित शारीरक मीमांसा भाष्ये चतुर्थस्याध्यायः चतुर्थः पादः।

स्तवम्-

विज्ञापणं यदिदमुद्यतु मामकीर्नम्।
अङ्गीकुरुष्वयतिराज दयांबुराशे।
अज्ञोयमात्मगुणलेश विवर्जितश्च
तस्मादनन्यशरणौ भवतीति मत्वा।।